श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे

# ॥ तृतीयाष्टके सप्तमः प्रश्नः ॥

## (अच्छिद्रम्)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तृतीयाष्टके सप्तमः प्रश्नः ॥
## (अच्छिद्रम्)

हरिः ओ(४)म्।
सर्वा॒न्॒ वा ए॒षो॑ऽग्नौ कामा॒न्प्रवे॑शयति।
यो॑ऽग्नीन॑न्वा॒धाय॑ व्र॒तमु॒पैति॑।
स यदनि॑ष्ट्वा प्रया॒यात्।
अका॑मप्रीता ए॒नं॒ कामा॒ नानु॒प्रया॑युः।
अ॒ते॒जा अ॑वी॒र्यः॑ स्यात्।
स जु॑हुयात्।
तुभ्यं॒ ता अ॑ङ्गिरस्तम।
विश्वाः॑ सु॒क्षि॒तयः॒ पृथ॑क्।
अग्ने॒ कामा॑य येमिर॒ इति॑।
कामा॑ने॒वास्मि॑न्दधाति ॥ 1 ॥

काम॑प्रीता ए॒नं॒ कामा॒ अनु॒ प्रया॑न्ति।
ते॒ज॒स्वी वी॒र्या॑वान्भवति।
सन्त॑ति॒र्वा ए॒षा य॒ज्ञस्य॑।
यो॑ऽग्नीन॑न्वा॒धाय॑ व्र॒तमु॒पैति॑।

Please let us know of any errors in this text.
sunder kidambi
prapatti dot com
sunder kidambi

स यदु॒द्वाय॑ति।
विच्छि॑त्तिरे॒वास्य॒ सा।
तं प्राञ्च॑मु॒द्धृत्य॑।
मन॒सोप॑तिष्ठेत।
मनो॒ वै प्र॒जाप॑तिः।
प्रा॒जा॒प॒त्यो य॒ज्ञः॥ 2॥

मन॑सै॒व य॒ज्ञग्ं सन्त॑नोति।
भूरित्या॑ह।
भू॒तो वै प्र॒जाप॑तिः।
भूति॑मे॒वोपै॑ति।
वि वा ए॒ष इ॑न्द्रि॒येण॑ वी॒र्ये॑णर्ध्यते।
यस्याहि॑ताग्नेर॒ग्निर॑प॒क्षाय॑ति।
याव॒च्छम्य॑या प्र॒विध्ये᳚त्।
यदि॒ ताव॑दप॒क्षाये᳚त्।
तग्ं॒ संभ॑रेत्।
इ॒दं त॒ एकं॑ प॒र उ॑त॒ एक᳚म्॥ 3॥

तृ॒तीये॑न॒ ज्योति॑षा॒ संवि॑शस्व।
सं॒वेश॑नस्त॒नुवै॒ चारु॑रेधि।
प्रि॒ये दे॒वानां᳚ पर॒मे ज॒नित्र॒ इति॑।
ब्रह्म॑णै॒वैन॒ग्॒ं संभ॑रति।

सैव ततः॒ प्राय॑श्चित्तिः।
यदि॑ परस्त॒राम॑प॒क्षायेँत्।
अ॒नु प्र॒यायाव॑स्येत्।
सो ए॒व ततः॒ प्राय॑श्चित्तिः।
ओष॑धी॒र्वा ए॒तस्यं॑ प॒शून्पय॒ः प्रवि॑शति।
यस्यं॑ ह॒विषे॑ व॒थ्सा अ॒पाकृ॑ता॒ धय॑न्ति॥ 4॥

तान् यद्दु॒ह्यात्।
या॒तयाँ॑म्ना ह॒विषा॑ यजेत।
यन्न दु॒ह्यात्।
य॒ज्ञ॒प॒रु॒र॒न्तरि॑यात्।
वा॒य॒व्याँ॑ यवा॒गूं निर्व॑पेत्।
वा॒युर्वै पय॑सः प्रदापयि॒ता।
स ए॒वास्मै॒ पय॒ः प्रदा॑पयति।
पयो॒ वा ओष॑धयः।
पय॒ः पय॑ः।
पय॑सै॒वास्मै॒ पयोऽव॑रुन्धे॥ 5॥

अथोत्त॑रस्मै ह॒विषे॑ व॒थ्सान॒पाकु॑र्यात्।
सैव ततः॒ प्राय॑श्चित्तिः।
अ॒न्य॒त॒रान् वा ए॒ष दे॒वान्भा॑ग॒धेये॑न॒ व्यर्धयति।
ये यज॑मानस्य सा॒यं गृ॒हमा॒गच्छ॑न्ति।

यस्यं सायं दु॒ग्धग्ं ह॒विरार्तिमा॒र्च्छतिं।
इन्द्रांय व्री॒हीन्नि॒रुप्योपंवसेत्।
पयो॒ वा ओषंधयः।
पयं ए॒वारभ्यं गृही॒त्वोपंवसति।
यत्प्रा॒तः स्यात्।
तच्छृ॒तं कुंर्यात्॥ **6**॥

अथेतंर ऐ॒न्द्रः पुं॒रो॒डाशः स्यात्।
इ॒न्द्रि॒ये ए॒वास्मैं स॒मीचीं दधाति।
पयो॒ वा ओषंधयः।
पय॒ः पयः।
पयंसै॒वास्मै॒ पयोऽवंरुन्धे।
अथोत्तंरस्मै ह॒विषें व॒थ्सान॒पाकुंर्यात्।
सैव तत॒ः प्रायंश्चित्तिः।
उ॒भया॒न् वा ए॒ष दे॒वान्भा॒ग॒धेयें॒न व्यंर्धयति।
ये यजंमानस्य सा॒यं चं प्रा॒तश्चं गृ॒हमा॒गच्छंन्ति।
यस्यो॒भयग्ं ह॒विरार्तिमा॒र्च्छतिं॥ **7**॥

ऐ॒न्द्रं पञ्चंशरावमोद॒नं निर्वंपेत्।
अ॒ग्निं दे॒वतांनां प्रथ॒मं यंजेत्।
अ॒ग्निमुंखा ए॒व दे॒वताः प्रीणाति।
अ॒ग्निं वा अन्व॒न्या दे॒वताः।

इन्द्रमन्वन्याः।
ता एवोभयीः प्रीणाति।
पयो वा ओषधयः।
पयः पयः।
पयसैवास्मै पयोऽवरुन्धे।
अथोत्तरस्मै हविषे वथ्सानपाकुर्यात्॥ **8**॥

सैव ततः प्रायश्चित्तिः।
अर्धो वा एतस्य यज्ञस्य मीयते।
यस्य व्रत्येऽहन्पत्न्यनालम्भुका भवति।
तामपरुध्य यजेत।
सर्वेणैव यज्ञेन यजते।
तामिष्ट्वोपह्वयेत।
अमूहमस्मि।
सा त्वम्।
द्यौरहम्।
पृथिवी त्वम्।
सामाहम्।
ऋक्त्वम्।
तावेहि संभवाव।
सह रेतो दधावहै।

sunder kidāmbi prapatti dot com sunder kidāmbi

पुग्ंसे पुत्राय वेत्तवै।
रायस्पोषाय सुप्रजास्त्वायं सुवीर्यायेति।
अर्ध एवैनामुपह्वयते।
सैव ततः प्रायश्चित्तिः॥ 9॥

दधाति यज्ञ उत एकं धयन्ति रुन्धे
कुर्यादाच्छेत्यपाकुर्यात्पृथिवी त्वमष्टौ च॥ 1॥

सर्वान् विवै यदि परस्तरामोषधीरन्यतरानुभयान्धो वै॥

यद्विष्षंण्णेन जुहुयात्।
अप्रजा अपशुर्यजमानः स्यात्।
यदनायतने निनयेत्।
अनायतनः स्यात्।
प्राजापत्ययर्चा वल्मीकवपायामवनयेत्।
प्राजापत्यो वै वल्मीकः।
यज्ञः प्रजापतिः।
प्रजापतावेव यज्ञं प्रतिष्ठापयति।
भूरित्याह।
भूतो वै प्रजापतिः॥ 10॥

भूतिमेवोपैति।
तत्कृत्वा।
अन्यां दुग्ध्वा पुनर् होतव्यम्।

सैव त॒तः प्राय॑श्चित्तिः।
यत्की॒टाव॑पन्नेन जु॒हु॒यात्।
अप्र॑जा अप॒शुर्यज॑मानः स्यात्।
यदना॑यतने नि॒नये॑त्।
अ॒ना॒य॒त॒नः स्या॑त्।
म॒ध्य॒मेन॑ प॒र्णेन॑ द्यावापृथि॒व्यं॑य॒र्चाऽन्तः॑ परि॒धि निन॑येत्।
द्यावा॑पृथि॒व्योरे॒वैन॒त्प्रति॑ष्ठापयति ॥ **11** ॥

तत्कृ॒त्वा।
अ॒न्यां दु॒ग्ध्वा पुन॑र् होत॒व्य॑म्।
सैव त॒तः प्राय॑श्चित्तिः।
यदव॑वृष्टेन जु॒हु॒यात्।
अप॑रूपमस्या॒त्मञ्जा॑येत।
कि॒लासो॑ वा॒ स्याद॑र्॒श॒सो वा॑।
यत्प्रत्ये॒यात्।
य॒ज्ञं वि॒च्छि॑न्द्यात्।
स जु॑हुयात्।
मि॒त्रो जना॑न्कल्पयति प्रजा॒नन्न् ॥ **12** ॥

मि॒त्रो दा॑धार पृथि॒वीमु॒त द्याम्।
मि॒त्रः कृ॒ष्टीरनि॑मिषा॒ऽभिच॑ष्टे।
स॒त्याय॑ ह॒व्यं घृ॒तव॑ज्जुहो॒तेति॑।

मि॒त्रेणै॒वैनं॑त्कल्पयति।
तत्कृ॒त्वा।
अ॒न्यां दु॒ग्ध्वा पुन॑र् होत॒व्य᳚म्।
सैव तत॒ः प्राय॑श्चित्तिः।
यत्पूर्व॑स्या॒माहु॑त्याग्ं हु॒ताया॒मुत्त॒राऽऽहु॑ति॒ः स्कन्दे᳚त्।
द्वि॒पाद्भि॑ः प॒शुभि॒र्यज॑माना॒ो व्यृ॑द्ध्येत।
यदुत्त॑रया॒ऽभिजु॑हु॒यात्॥ **13**॥

चतु॑ष्पाद्भिः प॒शुभि॒र्यज॑माना॒ो व्यृ॑द्ध्येत।
यत्र॒ वेत्थ॑ वनस्पते दे॒वानां॒ गुह्या॒ नामा॑नि।
तत्र॑ ह॒व्यानि॑ गाम॒येति॑ वानस्प॒त्यय॒र्चा स॒मिध॑मा॒धाय॑।
तू॒ष्णीमे॒व पुन॑र्जुहुयात्।
वन॒स्पति॑नै॒व य॒ज्ञस्यार्ति॑ चाना᳚र्तिं॒ चाहु॑ती॒ विदा॑धार।
तत्कृ॒त्वा।
अ॒न्यां दु॒ग्ध्वा पुन॑र् होत॒व्य᳚म्।
सैव तत॒ः प्राय॑श्चित्तिः।
यत्पु॒रा प्र॑या॒जेभ्य॒ः प्राङङ्गा॑र॒ः स्कन्दे᳚त्।
अ॒ध्व॒र्यवे॑ च॒ यज॑माना॒य चाकग्ग्॑ स्यात्॥ **14**॥

यद्द॑क्षि॒णा।
ब्र॒ह्मणे॑ च॒ यज॑माना॒य चाकग्ग्॑ स्यात्।
यत्प्र॒त्यक्।

होत्रे॑ च॒ पत्नि॑यै च॒ यज॑मानाय॒ चाक॒ग्ग्॒ स्यात्।
यदु॒दङ्।
अ॒ग्नीधे॑ च प॒शुभ्य॑श्च॒ यज॑मानाय॒ चाक॒ग्ग्॒ स्यात्।
यद॑भि जु॒हुयात्।
रु॒द्रो॑ऽस्य प॒शून्घातु॑कः स्यात्।
यन्नाभि॑ जु॒हुयात्।
अशा॒॑न्तः॒ प्रह्वि॑येत॥ **15**॥

स्रु॒वस्य॒ बुध्ने॑नाभि॒ निद॑ध्यात्।
मा त॑मो॒ मा य॒ज्ञस्त॑म॒न्मा यज॑मानस्तमत्।
नम॑स्ते अस्त्वाय॒ते।
नमो॑ रुद्र पराय॒ते।
नमो॒ यत्र॑ नि॒षीद॑सि।
अ॒मुं मा हिग्ं॑सीर॒मुं मा हिग्ं॑सी॒रिति॒ येन॒ स्कन्दे॑त्।
तं प्रह॑रेत्।
स॒हस्र॑शृङ्गो वृष॒भो जा॒तवे॑दाः।
स्तोम॑पृष्ठो घृ॒तवा॒॑न्थ्सु॒प्रती॑कः।
मा नो॑ हासीन्मेत्थि॒तो नेत्त्वा॒ जहा॑म।
गो॒पो॒षं नो॑ वीरपो॒षं च॑ य॒च्छेति॑।
ब्रह्म॑णै॒वैनं॒ प्रह॑रति।
सैव त॒तः प्राय॑श्चित्तिः॥ **16**॥

वै प्र॒जाप॑तिस्थापयति प्र॒जा॒न॒न्नभि॒जुं॑हु॒याथ्स्या᳚द्ध्रियेत॒
जहा॑म॒ त्रीणि॑ च॥ **2**॥

यद्विषिं॑ण्णेन प्राजाप॒त्यय॒र्चा यत्की॒टा म॑ध्य॒मेन॒
यदव॑वृष्टेन॒ यत्पूर्व॑स्यां॒ यत्पु॒रा प्र॑या॒जेभ्यः॒
प्राङ्ङ्गा॑रो॒ यद्द॑क्षि॒णा यत्प्र॒त्यग्यदुद॒ङ्ङः॥

वि वा ए॒ष इ॑न्द्रि॒येण॑ वी॒र्ये॑णर्द्ध्यते।
यस्याहि॑ताग्नेर॒ग्निर्म॒थ्यमा॑नो॒ न जाय॑ते।
यत्रा॒न्यं पश्ये᳚त्।
तत॑ आ॒हृत्य॑ होत॒व्य᳚म्।
अ॒ग्नावे॒वास्या᳚ग्निहो॒त्रग्ं हु॒तं भ॑वति।
यद्य॒न्यं न वि॒न्देत्।
अ॒जायाग्॑ होत॒व्य᳚म्।
आ॒ग्ने॒यी वा ए॒षा।
यद॒जा।
अ॒ग्नावे॒वास्या᳚ग्निहो॒त्रग्ं हु॒तं भ॑वति॥ **17**॥

अ॒जस्य॒ तु नाश्ञी॑यात्।
यद॒जस्या᳚श्ञी॒यात्।
याम॒ेवाग्नावाहु॑तिं जुहु॒यात्।
ताम॑द्यात्।
तस्मा॑द॒जस्य॒ नाश्य᳚म्।
यद्य॒जां न वि॒न्देत्।

sunder kidambi
prapatti dot com
sunder kidambi

ब्रा॒ह्म॒णस्य॒ दक्षि॑णे॒ हस्ते॑ होत॒व्य॑म्।
ए॒ष वा अ॒ग्निर्वै॑श्वान॒रः।
यद्ब्रा॑ह्म॒णः।
अ॒ग्नावे॒वास्या॑ग्निहो॒त्रग्ं हु॒तं भ॑वति॥ 18॥

ब्रा॒ह्म॒णं तु व॑स॒त्यै नाप॑रुन्ध्यात्।
यद्ब्रा॑ह्म॒णं व॑स॒त्या अ॑परु॒न्ध्यात्।
यस्मि॑न्ने॒वाग्नावाहु॑तिं जु॒हु॒यात्।
तं भा॑ग॒धेये॑न॒ व्य॑र्धयेत्।
तस्मा॑द्ब्राह्म॒णो व॑स॒त्यै नाप॒रुध्यः॑।
यदि॑ ब्राह्म॒णं न वि॒न्देत्।
द॒र्भ॒स्त॒म्बे हो॑त॒व्य॑म्।
अ॒ग्नि॒वान् वै द॑र्भस्त॒म्बः।
अ॒ग्नावे॒वास्या॑ग्निहो॒त्रग्ं हु॒तं भ॑वति।
द॒र्भाग्स्तु नाध्या॑सीत॥ 19॥

यद्द॒र्भान॒ध्यासी॑त।
याम॒वाग्नावाहु॑तिं जु॒हु॒यात्।
तामध्या॑सीत।
तस्मा॑द्द॒र्भा नाध्या॑सित॒व्याः॑।
यदि॑ द॒र्भान्न वि॒न्देत्।
अ॒प्सु हो॑त॒व्य॑म्।

आपो॒ वै सर्वा॑ दे॒वताः᳚।
दे॒वता᳚स्वे॒वास्या᳚ग्निहो॒त्रग्ं॒ हु॒तं भ॑वति।
आप॒स्तु न परि॑चक्षीत।
यदाप॑ः परि॒चक्षी॑त॥ **20**॥

याम्॒वाफ्स्वाहु॑तिं जु॒हु॒यात्।
तां परि॑चक्षीत।
तस्मा॒दापो॒ न प॑रि॒चक्ष्या᳚ः।
मेध्या॑ च॒ वा ए॒तस्या॑मे॒ध्या च॑ त॒नुवौ॒ सग्ं॒सृ॑ज्येते।
यस्याहि॑ताग्नेर॒न्यैर॒ग्निभि॑र॒ग्नय॑ः सग्ं॒सृ॒ज्यन्ते᳚।
अ॒ग्नये॒ विवि॑चये पु॒रो॒डाश॑म॒ष्टाक॑पाल॒ं निर्व॑पेत्।
मेध्या᳚ चै॒वास्या॑मे॒ध्यां च॑ त॒नुवौ॒ व्याव॑र्तयति।
अ॒ग्नये᳚ व्र॒तप॑तये पु॒रो॒डाश॑म॒ष्टाक॑पाल॒ं निर्व॑पेत्।
अ॒ग्निमे॒व व्र॒तप॑ति॒ग्ग्॒ स्वेन॑ भाग॒धेये॒नोप॑धावति।
स ए॒वैन॑ं व्र॒तमाल॑म्भयति॥ **21**॥

गर्भ॒ग्ग्॒ स्रव॑न्तमग॒दम॑कः।
अ॒ग्निरिन्द्र॒स्त्वष्टा॒ बृह॒स्पति॑ः।
पृथि॒व्यामव॑चुश्चोतै॒तत्।
नाभिप्राप्नो॑ति॒ निर्ऋ॑तिं परा॒चैः।
रेतो॒ वा ए॒तद्वाजि॑न॒माहि॑ताग्नेः।
यद॑ग्निहो॒त्रम्।

तद्यथ्स्रवेँत्।
रेतोँऽस्य् वाजिंनग्ग् स्रवेत्।
गर्भग्ग् स्रवंन्तमगुदमंकुरित्यांह।
रेतं एवास्मिन्वाजिंनं दधाति॥ **22**॥

अग्निरित्यांह।
अग्निर्वै रेंतोधाः।
रेतं एव तद्दंधाति।
इन्द्र इत्यांह।
इन्द्रियमेवास्मिंन्दधाति।
त्वष्टेत्यांह।
त्वष्टा वै पंशूनां मिंथुनानाग्ं रूपकृत्।
रूपमेव पशुषुं दधाति।
बृहस्पतिरित्यांह।
ब्रह्म वै देवानां बृहस्पतिंः।
ब्रह्मंणैवास्मैँ प्रजाः प्रजंनयति।
पृथिव्यामवंचुश्चोतैतदित्यांह।
अस्यामेवैनत्प्रतिंष्ठापयति।
नाभि प्राप्नोंति निरृंतिं पराचैरित्यांह।
रक्षंसामपंहत्यै॥ **23**॥

अ॒जाऽग्नावे॒वाऽस्याँऽग्निहो॒त्रग्ं हु॒तं भंवति
भवत्यासीत परि॒चक्षींत लम्भयति दधाति
दे॒वानां॒ बृह॒स्पति॒ः पश्चं च॥ 3॥

विवै यद्य॒न्यम॒जायाँ ब्राह्म॒णस्यं दर्भस्त॒म्बेँऽफ्सु
होंत॒व्यँम्॥

याः पु॒रस्ताँत्प्र॒स्रवंन्ति।
उ॒परिंष्टाथ्स॒र्वतं॒श्च याः।
ताभीं र॒श्मिपंवित्राभिः।
श्र॒द्धां य॒ज्ञमारंभे।
देवां गातुविदः।
गा॒तुं य॒ज्ञायं विन्दत।
मनंस॒स्पतिंना दे॒वेनं।
वाताँद्य॒ज्ञः प्रयुंज्यताम्।
तृ॒तीयंस्यै दि॒वः।
गा॒य॒त्रि॒या सोम॒ आभृंतः॥ 24॥

सो॒म॒पी॒थाय॒ सन्नंयितुम्।
वकंल॒मन्तंर॒मादंदे।
आपों देवीः शु॒द्धाः स्थं।
इ॒मा पात्राणि शुन्धत।
उ॒पा॒त॒ङ्क्याय दे॒वानाँम्।
प॒र्ण॒व॒ल्कमु॒त शुंन्धत।

पयो॑ गृ॒हेषु॒ पयो॑ अघ्नि॒यासु॑।
पयो॑ व॒थ्सेषु॒ पय॒ इन्द्रा॑य ह॒विषे᳚ ध्रियस्व।
गा॒य॒त्री प॑र्णव॒ल्केन॑।
पय॒ः सोमं॑ करोत्वि॒मम्॥ **25**॥

अ॒ग्निं गृ॑ह्णामि सु॒रथं॒ यो म॑यो॒भूः।
य उ॒द्यन्त॑मा॒रोह॑ति॒ सूर्य॒मह्ने᳚।
आ॒दि॒त्यं ज्योति॑षां॒ ज्योति॑रुत्त॒मम्।
श्वो य॒ज्ञाय॑ रमतां दे॒वता᳚भ्यः।
वसू᳚न्रु॒द्राना॑दि॒त्यान्।
इन्द्रे॑ण स॒ह दे॒वता᳚ः।
ताः पूर्व॒ः परि॑गृह्णामि।
स्व आ॒यत॑ने मनी॒षया᳚।
इ॒मामू॒र्जं पञ्च॒दशीं॑ ये प्रवि॑ष्टाः।
तान्दे॒वान्परि॑गृह्णामि॒ पूर्व॑ः॥ **26**॥

अ॒ग्निर् ह॑व्य॒वाडि॒ह तानाव॑हतु।
पौ॒र्ण॒मा॒सग्ं ह॒विरि॒दमे॑षां॒ मयि॑।
आ॒मा॒वा॒स्यग्ं ह॒विरि॒दमे॑षां॒ मयि॑।
अ॒न्त॒रा॒ऽग्नी प॒शव॑ः।
दे॒व॒स॒ग्ं॒स॒दमाग॑मन्।
तान्पूर्व॒ः परि॑गृह्णामि।



sunder kidambi prapatti dot com sunder kidambi

स्व आ॒यत॑ने मनी॒षयाँ।
इ॒ह प्र॒जा वि॒श्वरू॑पा रमन्ताम्।
अ॒ग्निं गृ॒हप॑तिम॒भि सं॒वसा॑नाः।
ताः पूर्वः॒ परि॑गृह्णामि॥ 27॥

स्व आ॒यत॑ने मनी॒षयाँ।
इ॒ह प॒शवो॑ वि॒श्वरू॑पा रमन्ताम्।
अ॒ग्निं गृ॒हप॑तिम॒भि सं॒वसा॑नाः।
तान्पूर्वः॒ परि॑गृह्णामि।
स्व आ॒यत॑ने मनी॒षयाँ।
अ॒यं पि॑तृ॒णाम॒ग्निः।
अवाँड्ढव्या पि॒तृभ्य॒ आ।
तं पूर्वः॒ परि॑गृह्णामि।
अवि॑षं नः पि॒तुं क॑रत्।
अजं॑स्र॒ त्वाग् सं॑भापा॒लाः॥ 28॥

वि॒ज॒यभां॑ग॒ग्॒ समिं॑न्धताम्।
अग्ने॑ दी॒दाय॑ मे सभ्य।
विजिं॑त्यै श॒रदः॑ श॒तम्।
अन्नं॑मावस॒थीयँम्।
अ॒भिहं॑राणि श॒रदः॑ श॒तम्।
आ॒व॒स॒थे श्रि॒यं॒ मन्त्रँम्।

अहि॑र्बु॒ध्नियो॒ निय॑च्छतु।
इ॒दम॒हम॒ग्निज्ये᳚ष्ठेभ्यः।
वसु॑भ्यो य॒ज्ञं प्रब्र॑वीमि।
इ॒दम॒हमिन्द्र॑ज्येष्ठेभ्यः॥ 29॥

रु॒द्रेभ्यो॑ य॒ज्ञं प्रब्र॑वीमि।
इ॒दम॒हं वरु॑णज्येष्ठेभ्यः।
आ॒दि॒त्येभ्यो॑ य॒ज्ञं प्रब्र॑वीमि।
पय॑स्वती॒रोष॑धयः।
पय॑स्वद्वी॒रुधां॒ पयः॑।
अ॒पां पय॑सो॒ यत्पयः॑।
तेन॒ मामि॑न्द्र॒ सग्ं॑सृ॑ज।
अग्ने᳚ व्रतपते व्र॒तं च॑रिष्यामि।
तच्छ॑केयं॒ तन्मे॑ राध्यताम्।
वायो᳚ व्रतपत॒ आदि॑त्य व्रतपते॥ 30॥

व्र॒ताना᳚ं व्रतपते व्र॒तं च॑रिष्यामि।
तच्छ॑केयं॒ तन्मे॑ राध्यताम्।
इ॒मां प्राची॒मुदी॑चीम्।
इष॒मूर्ज॑म॒भि सग्ग्स्कृ॑ताम्।
ब॒हु॒प॒र्णामशु॑ष्काग्राम्।
हरा॑मि प॒शु॒पाम॒हम्।

यत्कृष्णो रूपं कृत्वा।
प्राविंशस्त्वं वनस्पतीन्।
ततस्त्वामेकविंशतिधा।
संभरामि सुसंभृता॥ 31॥

त्रीन्परिधीग्स्तिस्रः समिधः।
यज्ञायुरनुसञ्चरान्।
उपवेषं मेक्षणं धृष्टिम्।
संभरामि सुसंभृता।
या जाता ओषधयः।
देवेभ्यस्त्रियुगं पुरा।
तासां पर्व राध्यासम्।
परिस्तरमाहरन्न्।
अपां मेध्यं यज्ञियम्।
सदेवगं शिवमस्तु मे॥ 32॥

आच्छेत्ता वो मा रिषम्।
जीवानि शरदः शतम्।
अपरिमितानां परिमिताः।
सन्नह्ये सुकृताय कम्।
एनो मा निगां कतमच्चनाहम्।
पुनरुत्थाय बहुला भवन्तु।

स॒कृ॒दा॒च्छि॒न्नं ब॒र्हिरूर्णा॑मृ॒दु।
स्यो॒नं पि॒तृभ्य॑स्त्वा भराम्य॒हम्।
अ॒स्मिन्थ्सी॑दन्तु मे पि॒तर॑ः सो॒म्याः।
पि॒ता॒म॒हाः प्रपि॑तामहा॒श्चानु॒गैः स॒ह॥ **33**॥

त्रि॒वृत्प॑ल॒ाशे द॒र्भः।
इया॒न्प्रादे॒शस॑म्मितः।
य॒ज्ञे प॒वित्रं॒ पोतृ॑तमम्।
पयो॑ ह॒व्यं क॑रोतु मे।
इ॒मौ प्रा॑णापा॒नौ।
य॒ज्ञस्याङ्गा॑नि स॒र्व॒शः।
आ॒प्या॒यय॑न्तौ॒ सञ्च॑रताम्।
प॒वित्रे॑ ह॒व्य॒शोध॑ने।
प॒वित्रे॒॑ स्थो॑ वैष्ण॒वी।
वा॒युर्वा॒॑ मन॑सा पुनातु॥ **34**॥

अ॒यं प्रा॒णश्चा॑पा॒नश्च॑।
यज॑मान॒मपि॑गच्छताम्।
य॒ज्ञे ह्यभू॑तां॒ पोता॑रौ।
प॒वित्रे॑ ह॒व्य॒शोध॑ने।
त्वया॒ वेदिं॑ विविदुः पृथि॒वीम्।
त्वया॑ य॒ज्ञो जा॑यते विश्व॒दानि॑ः।

अच्छि॑द्रं य॒ज्ञमन्वे॑षि वि॒द्वान्।
त्वया॒ होता॒ सन्त॑नोत्यर्धमा॒सान्।
त्र॒य॒स्त्रि॒ग्ं॒शो॑ऽसि॒ तन्तू॑नाम्।
प॒वित्रे॑ण स॒हाग॑हि॥ **35**॥

शि॒वेयग्ं रज्जु॑रभि॒धानी॑।
अ॒घ्नि॒यामुप॑सेवताम्।
अप्र॑स्रग्ंसाय य॒ज्ञस्य॑।
उ॒खे उप॑दधाम्य॒हम्।
प॒शुभि॒ः सन्नी॑तं बिभृताम्।
इन्द्रा॑य शृ॒तं दधि॑।
उ॒प॒वे॒षो॑ऽसि य॒ज्ञाय॑।
त्वां प॑रिवे॒षम॑धारयन्न्।
इन्द्रा॑य ह॒विः कृ॒ण्वन्त॑ः।
शि॒वः श॒ग्मो भ॑वासि नः॥ **36**॥

अमृ॑न्मयं देवपा॒त्रम्।
य॒ज्ञस्यायु॑षि॒ प्रयु॑ज्यताम्।
ति॒रः प॒वि॒त्रमति॑ नीताः।
आपो॑ धारय॒ माऽति॑गुः।
दे॒वेन॑ सवि॒त्रोत्पू॑ताः।
वसो॒ः सूर्य॑स्य र॒श्मिभि॑ः।

sunder kidāmbi prapatti dot com sunder kidāmbi

गां दो॑हपवि॒त्रे रज्जु᳚म्।
सर्वा॒ पात्रा॑णि शुन्धत।
ए॒ता आच॑रन्ति॒ मधु॑म॒द्दुहा॑नाः।
प्र॒जाव॑तीर्य॒शसो॑ वि॒श्वरू॑पाः॥ **37**॥

ब॒ह्वीर्भव॑न्ती॒रुप॒जाय॑मानाः।
इ॒ह व॒ इन्द्रो॑ रमयतु गावः।
पू॒षा स्थ॑।
अ॒य॒क्ष्मा वः॑ प्र॒जया॒ सग्ंसृ॑जामि।
रा॒यस्पोषे॑ण बहु॒ला भव॑न्तीः।
ऊर्ज॒ं पय॒ः पिन्व॑माना घृ॒तं च॑।
जी॒वो जीव॑न्ती॒रुप॑ वः सदेयम्।
द्यौश्चे॒मं य॒ज्ञं पृ॑थि॒वी च॒ सन्दु॑हाताम्।
धा॒ता सोमे॑न स॒ह वाते॑न वा॒युः।
यज॑मानाय॒ द्रवि॑णं दधातु॥ **38**॥

उत्स॑ं दुहन्ति क॒लशं॒ चतु॑र्बिलम्।
इडा᳚ं दे॒वीं मधु॑मतीग्ं सुव॒र्विद᳚म्।
तदि॑न्द्रा॒ग्नी जि॑न्वतग्ं सू॒नृता॑वत्।
तद्यज॑मानममृत॒त्वे द॑धातु।
काम॑धुक्ष॒ः प्रणो᳚ ब्रूहि।
इन्द्रा॑य ह॒विरि॑न्द्रि॒यम्।

अ॒मूं यस्यां᳚ दे॒वानां᳚म्।
म॒नु॒ष्या॑णां॒ पयो॑ हि॒तम्।
ब॒हु दु॒ग्धीन्द्रा॑य दे॒वेभ्यः॑।
ह॒व्यमाप्या॑यतां॒ पुनः॑॥ **39**॥

व॒थ्सेभ्यो॑ मनु॒ष्ये᳚भ्यः।
पु॒न॒र्दो॒हाय॑ कल्पताम्।
य॒ज्ञस्य॒ सन्त॑तिरसि।
य॒ज्ञस्य॑ त्वा॒ सन्त॑ति॒मनु॒ सन्त॑नोमि।
अद॑स्तमसि॒ विष्ण॑वे त्वा।
य॒ज्ञायापि॑दधाम्य॒हम्।
अ॒द्भिररि॑क्तेन॒ पात्रे॑ण।
याः पू॒ताः प॑रि॒शेर॑ते।
अ॒यं पय॒ः सोम॑ं कृ॒त्वा।
स्वां योनि॒मपि॑गच्छतु॥ **40**॥

प॒र्ण॒व॒ल्कः प॒वित्र᳚म्।
सौ॒म्यः सोमा॒द्धि निर्मि॑तः।
इ॒मौ प॒र्णं च॑ द॒र्भं च॑।
दे॒वाना॑ग्ं ह॒व्य॒शोध॑नौ।
प्रा॒त॒र्वे॒षाय॑ गोपाय।
विष्णो॑ ह॒व्यग्ं हि रक्ष॑सि।

sunder kidambi
prapatti dot com
sunder kidambi

उ॒भाव॒ग्नी उ॑पस्तृण॒ते।
दे॒वता॒ उप॑वसन्तु मे।
अ॒हं ग्रा॒म्यानुप॑ वसामि।
मह्यं॒ गोप॑तये प॒शून्॥ **41**॥

आभृ॑त इ॒मं गृ॑ह्णामि॒ पूर्व॒स्ताः पूर्वः॒ परि॑गृह्णामि
सभापा॒ला इन्द्र॑ज्येष्ठेभ्य॒ आदि॑त्य व्रतपते सुसं॒भृता॑ मे
स॒ह पु॑नातु गहि नो वि॒श्वरू॑पा दधातु॒ पुनर्ग॑च्छतु प॒शून्॥ **4**॥

याः पु॒रस्ता॑दि॒मामूर्ज॑मि॒ह प्र॒जा इ॒ह प॒शवो॒ऽयं पि॑तृ॒णाम॒ग्निः॥

देवा॑ दे॒वेषु॒ परा॑ क्रमध्वम्।
प्रथ॑मा द्वि॒तीये॑षु।
द्विती॑यास्तृ॒तीये॑षु।
त्रिरे॑कादशा इ॒ह मा॑ऽवत।
इ॒दग्ं शके॑यं॒ यदि॒दं कु॒रोमि॑।
आ॒त्मा क॑रोत्वा॒त्मने॑।
इ॒दं क॑रिष्ये भेष॒जम्।
इ॒दं मे॑ विश्वभेषजा।
अश्वि॑ना॒ प्राव॑तं यु॒वम्।
इ॒दम॒हग्ं सेना॑या अ॒भीत्व॑र्यै॥ **42**॥

मु॒खम॒पो॑हामि।
सूर्य॒ ज्योति॒र्विभा॑हि।

म॒ह॒त इ॑न्द्रि॒याय॑।
आप्या॑यतां घृ॒तयो॑निः।
अ॒ग्निर् ह॒व्याऽनु॑मन्यताम्।
खम॑ङ्क्ष्व॒ त्वच॑मङ्क्ष्व।
सु॒रू॒पं त्वा॑ वसु॒विद᳚म्।
प॒शू॒नां तेज॑सा।
अ॒ग्नये॒ जुष्ट॑म॒भिघा॑रयामि।
स्यो॒नं ते॒ सद॑नं करोमि॥ **43**॥

घृ॒तस्य॒ धार॑या सु॒शेव᳚ं कल्पयामि।
तस्मि᳚न्थ्सीदा॒मृते॒ प्रति॑तिष्ठ।
व्री॒ही॒णां मे॑ध सु॒मन॒स्यमा॑नः।
आ॒र्द्रः प्र॑थ॒स्नुर्भुव॑नस्य गो॒पाः।
शृ॒त उ॒त्स्ना॑ति जनि॒ता म॑ती॒नाम्।
यस्त॑ आ॒त्मा प॒शुषु॒ प्रवि॑ष्टः।
दे॒वाना᳚ं वि॒ष्ठामनु॒ यो वि॑त॒स्थे।
आ॒त्म॒न्वान्थ्सो॑म घृ॒तवा॒न् हि भू॒त्वा।
दे॒वान्ग॑च्छ॒ सुव॑र्विन्द॒ यज॑मानाय॒ मह्य᳚म्।
इरा॒ भूतिः॑ पृथि॒व्यै रसो॒ मोत्क्र॑मीत्॥ **44**॥

दे॒वा᳚ः पित॒रः पित॑रो दे॒वाः।
यो॑ऽहम॑स्मि॒ स सन् य॑जे।

यस्याँ॑स्मि॒न् न तम॒न्तरै॑मि।
स्वं म॑ इ॒ष्टग्ग्ं स्वं द॒त्तम्।
स्वं पू॒र्तग्ग्ं स्वग्ग्ं श्रा॒न्तम्।
स्वग्ं हु॒तम्।
तस्य॑ मे॒ऽग्निरु॑पद्र॒ष्टा।
वा॒युरु॑पश्रो॒ता।
आ॒दि॒त्यो॑ऽनुख्या॒ता।
द्यौः पि॒ता॥ **45**॥

पृ॒थि॒वी मा॒ता।
प्र॒जाप॑ति॒र्बन्धुः॑।
य ए॒वास्मि॒ स सन् यंजे।
मा भेर्मा संवि॑क्था॒ मा त्वा॑ हिग्ंसिषम्।
मा ते॒ तेजोऽप॑क्रमीत्।
भ॒र॒तमु॒द्धरे॑मनु॑षिञ्च।
अ॒व॒दाना॑नि ते प्र॒त्यव॑दास्यामि।
नम॑स्ते अस्तु॒ मा मा॑ हिग्ंसीः।
यद॑व॒दाना॑नि तेऽव॒द्यन्न्।
विलो॒माका॑र्षमा॒त्मनः॑॥ **46**॥

आज्ये॑न॒ प्रत्य॑नज्म्येनत्।
तत्त॒ आप्या॑यता॒ं पुनः॑।

अज्यां॑यो यवमा॒त्रात्।
आ॒व्या॒धात्कृं॑त्यतामि॒दम्।
मा रूं॑रुपाम य॒ज्ञस्यं॑।
शु॒द्धग्ग् स्विं॑ष्टमि॒दग्ं ह॒विः।
मनुं॑ना दृ॒ष्टां घृ॒तपं॑दीम्।
मि॒त्रावरुं॑णसमीरिताम्।
द॒क्षि॒णा॒र्धादसं᳚भिन्दन्न्।
अवं॑द्याम्येक॒तोमुं॑खाम्॥ **47**॥

इडे॑ भा॒गं जुं॑षस्व नः।
जिन्व॒ गा जिन्वार्वं॑तः।
तस्याँ᳚स्ते भक्षि॒वाणं॑ः स्याम।
स॒र्वात्मां॑नः स॒र्वगं॑णाः।
ब्रध्न॒ पिन्वं॑स्व।
ददं॑तो मे॒ मा क्षां॑यि।
कु॒र्व॒तो मे॒ मोपं॑दसत्।
दि॒शां क्लृप्तिं॑रसि।
दिशो॑ मे कल्पन्ताम्।
कल्पं॑न्तां मे॒ दिशः॑॥ **48**॥

दैवीं᳚श्च॒ मानुं॑षीश्च।
अ॒हो॒रा॒त्रे मे॑ कल्पेताम्।

sunder kidāmbi prapatti dot com sunder kidāmbi

अ॒र्ध॒मा॒सा मे॑ कल्पन्ताम्।
मासा॑ मे कल्पन्ताम्।
ऋ॒तवो॑ मे कल्पन्ताम्।
सं॒व॒थ्स॒रो मे॑ कल्पताम्।
क्लृप्ति॑रसि॒ कल्प॑तां मे।
आशा॑नां त्वाऽऽशापा॒लेभ्य॑ः।
च॒तुर्भ्यो॑ अ॒मृते᳚भ्यः।
इ॒दं भू॒तस्याध्य॑क्षेभ्यः ॥ **49** ॥

वि॒धेम॑ ह॒विषा॑ व॒यम्।
भज॑तां भा॒गी भा॒गम्।
माऽभा॒गोऽभ॑क्त।
निर॑भा॒गं भ॑जामः।
अ॒पस्पि॑न्व।
ओष॑धीर्जिन्व।
द्वि॒पात्पा॑हि।
चतु॑ष्पादव।
दि॒वो वृ॒ष्टिमेर॑य।
ब्रा॒ह्म॒णाना॑मि॒दग्ं ह॒विः ॥ **50** ॥

सो॒म्यानाग्ं॑ सोमपी॒थिना᳚म्।
निर्भ॒क्तो ब्रा᳚ह्मणः।

नेहाब्रा᳚ह्मणस्यास्ति।
सम॑ङ्क्तां ब॒र्॒हिर् ह॒विषा॑ घृ॒तेन॑।
समा॑दि॒त्यैर्वसु॑भि॒ः सं म॒रुद्भि॑ः।
समिन्द्रे॑ण॒ विश्वे॑भिर्दे॒वेभि॑रङ्क्ताम्।
दि॒व्यं नभो॑ गच्छतु॒ यथ्स्वाहा᳚।
इ॒न्द्रा॒णीवा॑ऽविध॒वा भू॑यासम्।
अदि॑तिरिव सुपु॒त्रा।
अ॒स्थू॒रि त्वा॑ गार्‌हपत्य॥ **51**॥

उप॒निष॑दे सुप्रजा॒स्त्वाय॑।
सं पत्नी॒ पत्या॑ सुकृ॒तेन॑ गच्छताम्।
य॒ज्ञस्य॑ यु॒क्तौ धु॒र्याव॑भूताम्।
स॒ञ्जा॒ना॒नौ विज॑हता॒मरा॑तीः।
दि॒वि ज्योति॑र॒जर॒मार॑भेताम्।
दर्श॑ ते त॒नुवो॑ यज्ञ य॒ज्ञिया᳚ः।
ताः प्री॑णातु॒ यज॑मानो घृ॒तेन॑।
ना॒रि॒ष्ठयो᳚ः प्र॒शिष॒मीड॑मानः।
दे॒वानां॒ दैव्येऽपि॒ यज॑मानो॒ऽमृतो॑ऽभूत्।
यं वा᳚ दे॒वा अ॑कल्पयन्॒॥ **52**॥

ऊ॒र्जो भा॒गग्ं श॑तक्रतू।
ए॒तद्वा॒ं तेन॑ प्रीणानि।

तेनं तृप्यतमगंहहौ।
अहं देवानाग्ं सुकृतांमस्मि लोके।
ममेदमिष्टं न मिथुंर्भवाति।
अहं नांरिष्ठावनुंयजामि विद्वान्।
यदांभ्यामिन्द्रो अदंधाद्भागधेयँम्।
अदांरसृद्भवत देव सोम।
अस्मिन् यज्ञे मंरुतो मृडता नः।
मा नों विददभि भामो अशंस्तिः॥ **53**॥

मा नों विददवृजना द्वेष्या या।
ऋषभं वाजिनं वयम्।
पूर्णमांसं यजामहे।
स नों दोहतागं सुवीर्यँम्।
रायस्पोषग्ं सहस्रिणँम्।
प्राणायं सुराधंसे।
पूर्णमांसाय स्वाहाँ।
अमावास्यां सुभगां सुशेवाँ।
धेनुरिंव भूयं आप्यायंमाना।
सा नों दोहतागं सुवीर्यँम्।
रायस्पोषग्ं सहस्रिणँम्।
अपानायं सुराधंसे।

अमावास्यायै स्वाहा।
अभिस्तृणीहि परिधेहि वेदिम्।
जामिं मा हिंसीरमुया शयाना।
होतृषदना हरिताः सुवर्णाः।
निष्का इमे यजमानस्य ब्रध्ने॥ **54**॥

अभीत्वर्यै करोमि क्रमीत्पिताऽऽत्मनं एकतोमुखां मे दिशोऽध्यक्षेभ्यो हविर्गार्हपत्याकल्पयन्नशंस्तिस्सा नो दोहतागं सुवीर्यगं सप्त च॥ **5**॥

परिस्तृणीत परिधत्ताग्निम्।
परिहितोऽग्निर्यजमानं भुनक्तु।
अपागं रस ओषधीनागं सुवर्णः।
निष्का इमे यजमानस्य सन्तु कामदुघाः।
अमुत्रामुष्मिंल्लोके।
भूपते भुवनपते।
महतो भूतस्य पते।
ब्रह्माणं त्वा वृणीमहे।
अहं भूपतिरहं भुवनपतिः।
अहं महतो भूतस्य पतिः॥ **55**॥

देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि।
देव सवितरेतं त्वा वृणते।

बृहस्पतिं दैव्यं ब्रह्माणम्।
तदहं मनसे प्रब्रवीमि।
मनो गायत्रियै।
गायत्री त्रिष्टुभे।
त्रिष्टुब्जगत्यै।
जगत्यनुष्टुभे।
अनुष्टुक्पङ्क्त्यै।
पङ्क्तिः प्रजापतये॥ **56**॥

प्रजापतिर्विश्वेभ्यो देवेभ्यः।
विश्वे देवा बृहस्पतये।
बृहस्पतिर्ब्रह्मणे।
ब्रह्म भूर्भुवः सुवः।
बृहस्पतिर्देवानां ब्रह्मा।
अहं मनुष्याणाम्।
बृहस्पते यज्ञं गोपाय।
इदं तस्मै हर्म्यं करोमि।
यो वो देवाश्चरति ब्रह्मचर्यम्।
मेधावी दिक्षु मनसा तपस्वी॥ **57**॥

अन्तर्दूतश्चरति मानुषीषु।
चतुः शिखण्डा युवतिः सुपेशाः।



sunder kidāmbi prapatti dot com sunder kidāmbi

घृ॒तप्र॑तीका॒ भुव॑नस्य॒ मध्ये᳚।
म॒र्मृ॒ज्यमा॑ना मह॒ते सौभ॑गाय।
मह्यं॑ धुक्ष्व॒ यज॑मानाय॒ कामा॑न्।
भूमि॑र्भू॒त्वा म॑हि॒मानं॑ पुपोष।
ततो॑ दे॒वी व॑र्धयते॒ पयाग्ं॑सि।
य॒ज्ञिया॑ य॒ज्ञं वि च॒ यन्ति॒ शं च॑।
ओष॑धी॒राप॑ इ॒ह शक्व॑रीश्च।
यो मा॑ हृ॒दा मन॑सा॒ यश्च॑ वा॒चा॥ **58**॥

यो ब्रह्म॑णा॒ कर्म॑णा॒ द्वेष्टि॑ देवाः।
यः श्रु॒तेन॒ हृद॑येनेष्ण॒ता च॑।
तस्ये᳚न्द्र॒ वज्रे॑ण॒ शिर॑श्छिनद्मि।
ऊर्णा॑मृदु॒ प्रथ॑मानग्ग्ं स्यो॒नम्।
दे॒वेभ्यो॒ जु॒ष्टग्ं॒ सद॑नाय ब॒र्हिः।
सु॒व॒र्गे लो॒के यज॑मान॒ग्ं॒ हि धे॒हि।
मां नाक॑स्य पृ॒ष्ठे प॑र॒मे व्यो॑मन्न्।
चतु॑ः शिखण्डा यु॒व॒तिः सु॒पेशा᳚ः।
घृ॒तप्र॑तीका व॒युना॑नि वस्ते।
सा स्ती॒र्यमा॑णा मह॒ते सौभ॑गाय॥ **59**॥

सा मे॑ धुक्ष्व॒ यज॑मानाय॒ कामा॑न्।
शि॒वा च॑ मे श॒ग्मा चैधि।

sunder kidambi prapatti dot com sunder kidambi

स्यो॒ना चं॑ मे सु॒षदा॑ चैधि।
ऊर्जं॑स्वती च मे॒ पयं॑स्वती चैधि।
इष॒मूर्जं॑ मे पिन्वस्व।
ब्रह्म॒तेजो॑ मे पिन्वस्व।
क्ष॒त्रमोजो॑ मे पिन्वस्व।
विशं॒ पुष्टिं॑ मे पिन्वस्व।
आयु॑र॒न्नाद्यं॑ मे पिन्वस्व।
प्र॒जां प॒शून्मे॑ पिन्वस्व॥ **60**॥

अ॒स्मिन् य॒ज्ञ उप॒ भूय॒ इन्नु मे॑।
अवि॑क्षोभाय परि॒धीन्द॑धामि।
ध॒र्ता ध॒रुणो॒ धरी॑यान्।
अ॒ग्निर्द्वेषा॒ग्ं॒सि॒ निरि॒तो नु॑दातै।
विच्छि॑न्दि॒ विधृं॑तीभ्यां॒ स॒पत्ना॑न्।
जा॒तान्भ्रातृ॑व्या॒न् ये च॑ जनि॒ष्यमा॑णाः।
वि॒शो॒ य॒न्त्राभ्यां॒ विध॑माम्येनान्।
अ॒हग्ग् स्वाना॑मुत्त॒मो॑ऽसानि देवाः।
वि॒शो य॒न्त्रे नु॒दमा॑ने॒ अरा॑तिम्।
विश्वं॑ पा॒प्मान॒मम॑तिं दु॒र्मरा॒युम्॥ **61**॥

सीद॑न्ती दे॒वी सु॑कृ॒तस्य॑ लो॒के।
धृती॑ स्थो॒ विधृ॑ती॒ स्वधृ॑ती।

प्रा॒णान्मयि॑ धारयतम्।
प्र॒जां मयि॑ धारयतम्।
प॒शून्मयि॑ धारयतम्।
अ॒यं प्र॑स्त॒र उ॒भय॑स्य ध॒र्ता।
ध॒र्ता प्र॑या॒जाना॑मु॒तानू॑या॒जाना॑म्।
स दा॑धार स॒मिधो॑ वि॒श्वरू॑पाः।
तस्मि॒न्थ्स्रुचो॒ अध्यासा॑दयामि।
आरो॑ह प॒थो जु॑हु देव॒याना॑न्॥ **62** ॥

यत्रर्ष॑यः प्रथम॒जा ये पु॑रा॒णाः।
हिर॑ण्यपक्षाऽजि॒रा सम्भृ॑ताङ्गा।
वहा॑सि मा सु॒कृतां॒ यत्र॑ लो॒काः।
अवा॒हं बा॑ध उप॒भृता॑ स॒पत्ना॑न्।
जा॒तान्भ्रातृ॑व्या॒न् ये च॑ जनि॒ष्यमा॑णाः।
दोहै॑ य॒ज्ञꣳ सु॒दुघा॑मिव धे॒नुम्।
अ॒हमुत्त॑रो भूयासम्।
अध॑रे॒ मथ्स॒पत्नाः॑।
यो मा॑ वा॒चा मन॑सा दुर्मरा॒युः।
हृ॒दाऽरा॑ती॒याद॑भि॒दास॑दग्ने॥ **63** ॥

इ॒दम॑स्य चि॒त्तमध॑रं ध्रु॒वायाः॑।
अ॒हमुत्त॑रो भूयासम्।

अध॑रे॒ मथ्स॒पत्ना᳚ः।
ऋ॒ष॒भो॑ऽसि शाक्व॒रः।
घृ॒ताची॑नाग्ं सू॒नुः।
प्रि॒येण॒ नाम्ना᳚ प्रि॒ये सद॑सि सीद।
स्यो॒नो मे॑ सीद सु॒षद॑ः पृथि॒व्याम्।
प्रथ॑यि प्र॒जया॑ प॒शुभि॑ः सुव॒र्गे लो॒के।
दि॒वि सी॑द पृथि॒व्याम॒न्तरि॑क्षे।
अ॒हमुत्त॑रो भूयासम्॥ **64**॥

अध॑रे॒ मथ्स॒पत्ना᳚ः।
इ॒यग्ग् स्था॒ली घृ॒तस्य॑ पू॒र्णा।
अच्छि॑न्नपयाः श॒तधा॑र॒ उथ्स॑ः।
मा॒रु॒ते॒न॒ शर्म॑णा॒ दैव्ये॑न।
य॒ज्ञो॑ऽसि स॒र्वत॑ः श्रि॒तः।
स॒र्वतो॒ मां भू॒तं भ॑वि॒ष्यच्छ्र॑यताम्।
श॒तं मे॑ सन्त्वा॒शिष॑ः।
स॒हस्रं॑ मे सन्तु सू॒नृता᳚ः।
इरा॑वतीः प॒शुमती᳚ः।
प्र॒जाप॑तिरसि स॒र्वत॑ः श्रि॒तः॥ **65**॥

स॒र्वतो॒ मां भू॒तं भ॑वि॒ष्यच्छ्र॑यताम्।
श॒तं मे॑ सन्त्वा॒शिष॑ः।

स॒हस्रं॑ मे सन्तु सू॒नृताः᳚।
इरा॑वतीः पश॒ुमतीः᳚।
इ॒दमि॑न्द्रि॒यम॒मृतं॑ वी॒र्य᳚म्।
अ॒नेनेन्द्रा॑य प॒शवो॑ऽचिकित्सन्न्।
तेन॑ देवा अव॒तोप॒ माम्।
इ॒हेष॒मूर्जं॒ यश॒ः सह॒ ओज॑ः सनेयम्।
शृतं मयि॑ श्रयताम्।
यत्पृ॑थि॒वीमच॑र॒त्तत्प्रवि॑ष्टम्॥ **66**॥

येनासि॑ञ्च॒द्बल॒मिन्द्रे᳚ प्र॒जाप॑तिः।
इ॒दं तच्छु॒क्रं मधु॑ वा॒जिनी॑वत्।
येनो॒परि॑ष्टा॒दधि॑नो॒न्मह॒ेन्द्रम्।
दधि॒ मां धिनोतु।
अ॒यं वे॒दः पृ॑थि॒वीमन्व॑विन्दत्।
गुहा॑ स॒तीं गह॑ने॒ गह्व॑रेषु।
स वि॑न्दतु यज॑मानाय लो॒कम्।
अच्छि॑द्रं य॒ज्ञं भूरि॑कर्मा करोतु।
अ॒यं य॒ज्ञः सम॑सदद्ध॒विष्मा॑न्।
ऋ॒चा साम्ना॒ यजु॑षा दे॒वता॑भिः॥ **67**॥

तेन॑ लो॒कान्थ्सूर्य॑वतो जयेम।
इन्द्र॑स्य स॒ख्यम॑मृत॒त्वम॑श्याम्।

यो न॒ः कनी॑य इ॒ह का॒मया॑तै।
अ॒स्मिन् य॒ज्ञे यज॑मानाय॒ मह्य᳚म्।
अप॒ तमि॑न्द्रा॒ग्नी भुव॑नान्नुदेताम्।
अ॒हं प्र॒जां वी॒रव॑तीं विदेय।
अग्ने॑ वाजजित्।
वाजं॑ त्वा सरि॒ष्यन्त᳚म्।
वाजं॑ जे॒ष्यन्त᳚म्।
वा॒जिनं॑ वाज॒जित᳚म्॥ **68**॥

वा॒ज॒जि॒त्यायै॒ सम्मा᳚र्ज्मि।
अ॒ग्निम॑न्ना॒दम॒न्नाद्या॑य।
उप॑हूतो॒ द्यौः पि॒ता।
उप॒ मां द्यौः पि॒ता ह्व॑यताम्।
अ॒ग्निराग्नी᳚द्ध्रात्।
आयु॑षे॒ वर्च॑से।
जी॒वात्वै॒ पुण्या॑य।
उप॑हूता पृथि॒वी मा॒ता।
उप॒ मां मा॒ता पृ॑थि॒वी ह्व॑यताम्।
अ॒ग्निराग्नी᳚द्ध्रात्॥ **69**॥

आयु॑षे॒ वर्च॑से।
जी॒वात्वै॒ पुण्या॑य।

sunder kidāmbi prapatti dot com sunder kidāmbi

मनो॒ ज्योति॑र्जुषता॒माज्य᳚म्।
विच्छि॑न्नं य॒ज्ञग्ं समि॒मं द॑धातु।
बृह॒स्पति॑स्तनुतामि॒मं न॑ः।
विश्वे॑ दे॒वा इ॒ह मा॑दयन्ताम्।
यं ते॑ अग्न आवृ॒श्चामि॑।
अ॒हं वा᳚ क्षिपि॒तश्चर॑न्न्।
प्र॒जां च॒ तस्य॒ मूलं॑ च।
नी॒चैर्दे॒वा निवृ॑श्चत॥ **70**॥

अग्ने॒ यो नो॑ऽभि॒दास॑ति।
स॒मा॒नो यश्च॒ निष्ट्य॑ः।
इ॒ध्मस्ये॑व प्र॒क्षाय॑तः।
मा तस्योच्छे॑षि॒ किञ्च॒न।
यो मां द्वेष्टि॑ जातवेदः।
यं चा॒हं द्वेष्मि॒ यश्च॒ माम्।
सर्वा॒ग्॒स्तान॑ग्ने॒ सन्द॑ह।
याग्श्चा॒हं द्वेष्मि॒ ये च॒ माम्।
अग्ने॑ वाजजित्।
वाजं॑ त्वा ससृ॒वाग्ंस᳚म्॥ **71**॥

वाजं॑ जिगि॒वाग्ंस᳚म्।
वा॒जिनं॑ वाज॒जित᳚म्।

वा॒ज॒जि॒त्यायै॒ सम्मा᳚र्ज्मि।
अ॒ग्निम॑न्ना॒दम॒न्नाद्या॑य।
वेदि॑र्ब॒र्‌हिः शृ॒तग्ं ह॒विः।
इ॒ध्मः प॑रि॒धय॒ः स्रुच॑ः।
आज्य॑ं य॒ज्ञ ऋचो॒ यजु॑ः।
या॒ज्या᳚श्च वषट्का॒राः।
सं मे॒ सन्न॑तयो नमन्ताम्।
इ॒ध्म॒स॒न्नह॑ने हु॒ते॥ 72॥

दि॒वः खीलोऽव॑ततः।
पृ॒थि॒व्या अध्युत्थि॑तः।
तेना॑ स॒हस्र॑काण्डेन।
द्वि॒षन्तग्ं॑ शोचयामसि।
द्वि॒षन्मे॑ ब॒हु शो॑चतु।
ओष॑धे॒ मो अ॒हग्ं शु॑चम्।
य॒ज्ञ नम॑स्ते यज्ञ।
नमो॒ नम॑श्च ते यज्ञ।
शि॒वेन॑ मे॒ सन्ति॑ष्ठस्व।
स्यो॒नेन॑ मे॒ सन्ति॑ष्ठस्व॥ 73॥

सु॒भू॒तेन॑ मे॒ सन्ति॑ष्ठस्व।
ब्र॒ह्म॒व॒र्च॒सेन॑ मे॒ सन्ति॑ष्ठस्व।

य॒ज्ञस्यर्द्धि॒मनु॒ सन्ति॑ष्ठस्व।
उप॑ ते यज्ञ॒ नम॑ः।
उप॑ ते॒ नम॑ः।
उप॑ ते॒ नम॑ः।
त्रिष्फ॒ली क्रि॒यमा॑णानाम्।
यो न्य॒ङ्गो अ॑व॒शिष्य॑ते।
रक्षा॑सां भाग॒धेय॑म्।
आप॒स्तत्प्रव॑हतादि॒तः॥ 74॥

उ॒लूख॑ले॒ मुस॑ले॒ यच्च॒ शूर्पे॑।
आ॒शि॒श्लेष॑ दृ॒षदि॒ यत्क॒पाले॑।
अ॒व॒प्रुषो॑ वि॒प्रुष॒ः संय॑जामि।
विश्वे॑ दे॒वा ह॒विरि॒दं जु॑षन्ताम्।
य॒ज्ञे या वि॒प्रुष॒ः सन्ति॑ ब॒ह्वीः।
अ॒ग्नौ ताः सर्वा॒ः स्वि॑ष्टा॒ः सुहु॑ता जुहोमि।
उ॒द्यन्न॒द्य मि॑त्रमहः।
स॒पत्ना॑न्मे अनीनशः।
दिवै॑नान् वि॒द्युता॑ जहि।
नि॒म्रोच॒न्नध॑रान्कृधि॥ 75॥

उ॒द्यन्न॒द्य वि नो॑ भज।
पि॒ता पु॒त्रेभ्यो॒ यथा॑।

दी॒र्घा॒यु॒त्वस्यं॑ हेशिषे।
तस्यं॑ नो देहि सूर्य।
उ॒द्यन्न॒द्य मि॑त्रमहः।
आ॒रोह॒न्नुत्त॑रां॒ दिव॒ँम्।
हृ॒द्रो॒गं मम॑ सूर्य।
ह॒रि॒माणं॑ च नाशय।
शुके॑षु मे ह॒रि॒माण॒ँम्।
रो॒प॒णाका॑सु दध्मसि॥ 76॥

अथो॑ हारि॒द्रवे॑षु मे।
ह॒रि॒माणं॒ निद॑ध्मसि।
उद॑गाद॒यमा॑दि॒त्यः।
विश्वे॑न॒ सह॑सा स॒ह।
द्वि॒षन्तं॒ मम॑ र॒न्धयन्॑।
मो अ॒हं द्वि॑ष॒तो र॑धम्।
यो न॒ः शपा॒दश॑पतः।
यश्च॑ न॒ः शप॑त॒ः शपा॒त्।
उ॒षाश्च॒ तस्मै॑ नि॒म्रुक्च॑।
सर्वं॑ पा॒पग्ं सम॑हताम्॥ 77॥

यो न॑ः स॒पत्नो॒ यो रण॑ः।
मर्तो॑ऽभि॒दास॑ति देवाः।

इ॒ध्मस्ये॑व प्र॒क्षाय॑तः।
मा तस्योच्छे॑षि॒ किञ्च॒न।
अव॑सृष्ट॒ः परा॑पत।
श॒रो ब्रह्म॑सग्ंशितः।
गच्छा॒मित्रा॒न्प्रवि॑श।
मैषां॒ कञ्च॒नोच्छि॑षः॥ 78॥

पति॑ः प्र॒जाप॑तये तप॒स्वी वा॒चा सौभ॑गाय प॒शून्मे॑ पिन्वस्व दु॒र्मरा॒यु॒ दे॑व॒याना॑नग्ने॒ऽन्तरि॑क्षे॒ऽहमुत्त॑रो भूयासं प्र॒जाप॑तिरसि स॒र्वत॑श्श्रि॒तः प्रवि॑ष्टं दे॒वता॑भिर्वा॒जजि॑तं पृ॒थि॒वी ह्व॑यतामृ॒ग्निराग्नी॑ध्राद्वृश्चत ससृ॒वाग्ंसग्ं॑ हु॒ते स्यो॒नेन॑ मे॒ सन्ति॑ष्ठस्वे॒तः कृ॑धि दध्मस्यूहतामृ॒ष्टौ च॑॥ 6॥

सक्षे॒दं प॑श्य।
विध॑र्तरि॒दं प॑श्य।
नाके॒दं प॑श्य।
र॒मति॒ः पनि॑ष्ठा।
ऋ॒तं व॒र्षिष्ठम्।
अ॒मृता॒ यान्या॒हुः।
सूर्यो॒ वरि॑ष्ठो अ॒क्षभि॒र्विभा॑ति।
अनु॒ द्यावा॑पृथि॒वी दे॒वपु॑त्रे।
दी॒क्षाऽसि॒ तप॑सो॒ योनि॑ः।
तपो॑ऽसि॒ ब्रह्म॑णो॒ योनि॑ः॥ 79॥

ब्रह्मा॑सि क्ष॒त्रस्य॒ योनिः॑।
क्ष॒त्रम॑स्यृ॒तस्य॒ योनिः॑।
ऋ॒तम॑सि॒ भूरार॑भे।
श्र॒द्धां मन॑सा।
दी॒क्षां तप॑सा।
विश्व॑स्य॒ भुव॑न॒स्याधि॑पत्नीम्।
सर्वे॒ कामा॒ यज॑मानस्य सन्तु।
वातं᳚ प्रा॒णं मन॑सा॒ऽन्वार॑भामहे।
प्र॒जाप॑तिं॒ यो भुव॑नस्य गो॒पाः।
स नो॑ मृ॒त्योस्त्रा॑यतां॒ पात्वग्ं॒ह॑सः॥ **80**॥

ज्योग्जी॒वा ज॒राम॑शीमहि।
इन्द्र॑ शाक्वर गाय॒त्रीं प्रप॑द्ये।
तां ते॑ युनज्मि।
इन्द्र॑ शाक्वर त्रि॒ष्टुभं॒ प्रप॑द्ये।
तां ते॑ युनज्मि।
इन्द्र॑ शाक्वर॒ जग॑तीं॒ प्रप॑द्ये।
तां ते॑ युनज्मि।
इन्द्र॑ शाक्वरानु॒ष्टुभं॒ प्रप॑द्ये।
तां ते॑ युनज्मि।
इन्द्र॑ शाक्वर प॒ङ्क्तिं प्रप॑द्ये॥ **81**॥

तां ते॑ युनज्मि।
आऽहं दी॒क्षाम॑रुहमृ॒तस्य॒ पत्नी᳚म्।
गा॒य॒त्रेण॒ छन्द॑सा॒ ब्रह्म॑णा च।
ऋ॒तग्ं स॒त्ये॑ऽधायि।
स॒त्यमृ॒ते॑ऽधायि।
ऋ॒तं च॑ मे स॒त्यं चा॑भूताम्।
ज्योति॑रभूव॒ग्ं॒ सुव॑रगमम्।
सु॒व॒र्गं लो॒कं नाक॑स्य पृ॒ष्ठम्।
ब्र॒ध्नस्य॑ वि॒ष्टप॑मगमम्।
पृ॒थि॒वी दी॒क्षा॥ **82**॥

तया॒ऽग्निर्दी॒क्षया॑ दीक्षि॒तः।
यया॒ऽग्निर्दी॒क्षया॑ दीक्षि॒तः।
तया᳚ त्वा दी॒क्षया॑ दीक्षयामि।
अ॒न्तरि॑क्षं दी॒क्षा।
तया॑ वा॒युर्दी॒क्षया॑ दीक्षि॒तः।
यया॑ वा॒युर्दी॒क्षया॑ दीक्षि॒तः।
तया᳚ त्वा दी॒क्षया॑ दीक्षयामि।
द्यौर्दी॒क्षा।
तया॑ऽऽदि॒त्यो दी॒क्षया॑ दीक्षि॒तः।
यया॑ऽऽदि॒त्यो दी॒क्षया॑ दीक्षि॒तः॥ **83**॥

तयाँ॒ त्वा दी॒क्षयाँ॒ दीक्षयामि।
दिशोँ॒ दी॒क्षा।
तयाँ॒ च॒न्द्रमाँ॒ दी॒क्षयाँ॒ दीक्षि॒तः।
ययाँ॒ च॒न्द्रमाँ॒ दी॒क्षयाँ॒ दीक्षि॒तः।
तयाँ॒ त्वा दी॒क्षयाँ॒ दीक्षयामि।
आपोँ॒ दी॒क्षा।
तया॒ वरुँ॒णो॒ राजाँ॒ दी॒क्षयाँ॒ दीक्षि॒तः।
यया॒ वरुँ॒णो॒ राजाँ॒ दी॒क्षयाँ॒ दीक्षि॒तः।
तयाँ॒ त्वा दी॒क्षयाँ॒ दीक्षयामि।
ओषँ॒धयो दी॒क्षा॥ **84**॥

तया॒ सोमो॒ राजाँ॒ दी॒क्षयाँ॒ दीक्षि॒तः।
यया॒ सोमो॒ राजाँ॒ दी॒क्षयाँ॒ दीक्षि॒तः।
तयाँ॒ त्वा दी॒क्षयाँ॒ दीक्षयामि।
वाग्दी॒क्षा।
तयाँ॒ प्रा॒णो दी॒क्षयाँ॒ दीक्षि॒तः।
ययाँ॒ प्रा॒णो दी॒क्षयाँ॒ दीक्षि॒तः।
तयाँ॒ त्वा दी॒क्षयाँ॒ दीक्षयामि।
पृ॒थि॒वी त्वा॒ दीक्षँ॒माण॒मनुँ॒ दीक्षताम्।
अ॒न्तरिँ॒क्षं त्वा॒ दीक्षँ॒माण॒मनुँ॒ दीक्षताम्।
द्यौस्त्वा॒ दीक्षँ॒माण॒मनुँ॒ दीक्षताम्॥ **85**॥

दिशं॑स्त्वा दीक्ष॑माणमनुं दीक्षन्ताम्।
आपं॑स्त्वा दीक्ष॑माणमनुं दीक्षन्ताम्।
ओषं॑धयस्त्वा दीक्ष॑माणमनुं दीक्षन्ताम्।
वाक्त्वा दीक्ष॑माणमनुं दीक्षताम्।
ऋचं॑स्त्वा दीक्ष॑माणमनुं दीक्षन्ताम्।
सामा॑नि त्वा दीक्ष॑माणमनुं दीक्षन्ताम्।
यजू॑ग्ंषि त्वा दीक्ष॑माणमनुं दीक्षन्ताम्।
अह॑श्च रात्रि॑श्च।
कृषिश्च वृष्टि॑श्च।
त्विषि॑श्चाप॑चितिश्च॥ **86**॥

आप॑श्चौष॑धयश्च।
ऊर्क्च॑ सूनृता॑ च।
तास्त्वा दीक्ष॑माणमनुं दीक्षन्ताम्।
स्वे दक्षे दक्ष॑पितेह सी॑द।
देवाना॑ग्ं सुम्नो म॑हते रणा॑य।
स्वासस्थस्तनुवा सं॑वि॑शस्व।
पितेवै॑धि सूनव आसुशेवः॑।
शिवो मा॑ शिवमावि॑श।
सत्यं म॑ आत्मा।
श्रद्धा मेऽक्षि॑तिः॥ **87**॥

तपो॑ मे प्रति॒ष्ठा।

स॒वि॒तृप्र॑सूता मा॒ दिशो॑ दीक्षयन्तु।

स॒त्यम॑स्मि।

अ॒हं त्वद॑स्मि॒ मद॑सि॒ त्वमे॒तत्।

ममा॑सि॒ योनि॒स्तव॒ योनि॑रस्मि।

ममै॒व सन्वह॑ ह॒व्यान्य॑ग्ने।

पु॒त्रः पि॒त्रे लो॑क॒कृज्जा॑तवेदः।

आ॒जु॒ह्वा॑नः सु॒प्रती॑कः पु॒रस्ता᳚त्।

अग्ने॒ स्वां योनि॒मासी॑द सा॒ध्या।

अ॒स्मिन्थ्स॒धस्थे॒ अध्युत्त॑रस्मिन्॥ **88**॥

विश्वे॑ देवा॒ यज॑मानश्च सीदत।

एक॑मि॒षे विष्णु॒स्त्वाऽन्वे॑तु।

द्वे ऊ॒र्जे विष्णु॒स्त्वाऽन्वे॑तु।

त्रीणि॑ व्र॒ताय॒ विष्णु॒स्त्वाऽन्वे॑तु।

च॒त्वारि॒ मायो॑ भवाय॒ विष्णु॒स्त्वाऽन्वे॑तु।

पञ्च॑ प॒शुभ्यो॒ विष्णु॒स्त्वाऽन्वे॑तु।

षड्रा॒यस्पोषा॑य॒ विष्णु॒स्त्वाऽन्वे॑तु।

स॒प्त स॒प्तभ्यो॒ होत्रा᳚भ्यो॒ विष्णु॒स्त्वाऽन्वे॑तु।

सखा॑यः स॒प्तप॑दा अभूम।

स॒ख्यं ते॑ गमेयम्॥ **89**॥

स॒ख्यात्ते॒ मा योषम्।
स॒ख्यान्मे॒ मा योष्ठाः।
साऽसि सुब्रह्मण्ये।
तस्यास्ते पृथि॒वी पादः।
साऽसि सुब्रह्मण्ये।
तस्यास्ते॒ऽन्तरिक्षं॒ पादः।
साऽसि सुब्रह्मण्ये।
तस्यास्ते॒ द्यौः पादः।
साऽसि सुब्रह्मण्ये।
तस्यास्ते॒ दिश॒ः पादः॥ **90**॥

प॒रोरंजास्ते पञ्च॒मः पादः।
सा न॒ इष॒मूर्जं धुक्ष्व।
तेजं इन्द्रि॒यम्।
ब्र॒ह्म॒व॒र्च॒सम॒न्नाद्यम्।
विमिमे त्वा॒ पयस्वतीम्।
दे॒वानां धे॒नुगं सु॒दुघा॒मनंपस्फुरन्तीम्।
इन्द्र॒ः सोमं पिबतु।
क्षेमो अस्तु नः।
इ॒मां नंराः कृणुत॒ वेदि॒मेत्यं।
वसुंमतीगं रु॒द्रवंतीमादि॒त्यवंतीम्॥ **91**॥

वर्ष्मन्दि॒वः।
नाभा॑ पृथि॒व्याः।
यथा॒ऽयं यज॑माना॒ न रिष्ये॓त्।
दे॒वस्य॑ सवि॒तुः स॒वे।
चतुः॑ शिखण्डा युव॒तिः सु॒पेशाः॓।
घृतप्र॑तीका॒ भुव॑नस्य॒ मध्ये॓।
तस्याग्ं॑ सुप॒र्णावधि॒ यौ निवि॑ष्टौ।
तयो॓र्दे॒वाना॒मधि॑ भाग॒धेय॓म्।
अप॒ जन्यं॑ भयं नु॑द।
अप च॒क्राणि॑ वर्तय।
गृहग्ं॑ सोम॑स्य गच्छतम्।
न वा उ॑वे॒तन्म्रि॑यसे॒ न रि॑ष्यसि।
दे॒वाग्ं इदे॑षि प॒थिभिः॑ सु॒गेभिः॑।
यत्र॒ यन्ति॑ सु॒कृतो॒ नापि॑ दु॒ष्कृतः॑।
तत्र॑ त्वा दे॒वः स॑वि॒ता द॑धातु॥ **92**॥

ब्रह्म॑णो॒ योनि॒रग्ं॑ह॒सः प॒ङ्क्तिं प्रप॑द्ये दी॒क्षा
यया॑ऽऽदि॒त्यो दी॒क्षया॑ दीक्षि॒तस्तया॓ त्वा दी॒क्षया॑
दीक्षया॒म्योष॑धयो दी॒क्षा द्यौस्त्वा॒
दीक्ष॑माण॒मनु॑दीक्षता॒मप॑चिति॒श्चाऽक्षि॑ति॒रुत्त॑रस्मिन्गमेयं॒
दिशः॒ पाद॑ आदि॒त्यव॑र्तीं वर्तय॒ पञ्च॑ च॥ **7**॥

यद॒स्य पा॒रे रज॑सः।
शु॒क्रं ज्योति॒रजा॑यत।
तन्नः॑ पर्॒ष॒दति॒ द्विषः॑।
अग्ने॑ वैश्वानर॒ स्वाहा᳚।
यस्मा᳚द्भी॒षाऽवा॑शिष्ठाः।
ततो॑ नो॒ अभ॑यं कृधि।
प्र॒जाभ्यः॒ सर्वा᳚भ्यो मृड।
नमो॑ रु॒द्राय॑ मी॒ढुषे᳚।
यस्मा᳚द्भी॒षा न्यष॑दः।
ततो॑ नो॒ अभ॑यं कृधि॥ **93**॥

प्र॒जाभ्यः॒ सर्वा᳚भ्यो मृड।
नमो॑ रु॒द्राय॑ मी॒ढुषे᳚।
उदु॑स्र तिष्ठ॒ प्रति॑तिष्ठ॒ मा रि॑षः।
मेमं य॒ज्ञं यज॑मानं च रीरिषः।
सु॒व॒र्गे लो॒के यज॑मान॒ग्ं॒ हि धे॒हि।
शं न॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे।
यस्मा᳚द्भी॒षाऽवे॑पिष्ठाः प॒लायि॑ष्ठाः स॒मज्ञा᳚स्थाः।
ततो॑ नो॒ अभ॑यं कृधि।
प्र॒जाभ्यः॒ सर्वा᳚भ्यो मृड।
नमो॑ रु॒द्राय॑ मी॒ढुषे᳚॥ **94**॥



sunder kidāmbi prapatti dot com sunder kidāmbi

य इ॒दम॑कः।

तस्मै॒ नमः॑।

तस्मै॒ स्वाहा᳚।

न वा उ॑ वे॒तन्म्रि॑यसे।

आशा॑नां त्वा॒ विश्वा॒ आशाः᳚।

य॒ज्ञस्य॒ हि स्थ ऋ॒त्वियौ᳚।

इन्द्रा᳚ग्नी॒ चेत॑नस्य च।

हु॒ता॒हु॒तस्य॑ तृप्यतम्।

अहु॑तस्य हु॒तस्य॑ च।

हु॒तस्य॒ चाहु॑तस्य च।

अहु॑तस्य हु॒तस्य॑ च।

इन्द्रा᳚ग्नी अ॒स्य सोम॑स्य।

वी॒तं पिब॑तं जु॒षेथा᳚म्।

मा यज॑मानं॒ तमो॑ विदत्।

मर्त्विजो॒ मो इ॒माः प्र॒जाः।

मा यः सोम॑मि॒मं पिबा᳚त्।

सग्ँ॒सृ॑ष्टमु॒भयं॑ कृ॒तम्॥ 95॥

कृ॒धि॒ मी॒ढुषेऽहु॑तस्य स॒प्त च॑॥ 8॥

अ॒ना॒गस॑स्त्वा व॒यम्।

इन्द्रे॑ण॒ प्रेषि॑ता॒ उप॑।

वा॒युष्टे॑ अस्त्वग्ं॑श॒भूः।
मि॒त्रस्ते॑ अस्त्वग्ं॑श॒भूः।
वरु॑णस्ते अस्त्वग्ं॑श॒भूः।
अपा᳚ं क्षया॒ ऋत॑स्य गर्भाः।
भुव॑नस्य गोपा॒ः श्येना॑ अतिथयः।
पर्व॑तानां ककुभः प्र॒युतो॑ नपातारः।
व॒ग्नुनेन्द्रग्ग्ं॑ ह्वयत।
घोषे॒णामी॑वाग्श्चातयत॥ **96**॥

यु॒क्ताः स्थ॒ वह॑त।
दे॒वा ग्रावा॑ण॒ इन्दु॒रिन्द्र॒ इत्य॑वादिषुः।
एन्द्र॑मचुच्यवुः प॒रम॒स्या᳚ः परा॒वत॑ः।
आऽस्माथ्स॒धस्था᳚त्।
ओरोर॒न्तरि॑क्षात्।
आ सु॑भू॒तम॑सुषवुः।
ब्र॒ह्म॒व॒र्च॒सं म॒ आऽसु॑षवुः।
स॒म॒रे रक्षाग्ं॑स्यवधिषुः।
अप॑हतं ब्रह्म॒ज्यस्य॑।
वाक्च॑ त्वा॒ मन॑श्च श्रीणीताम्॥ **97**॥

प्रा॒णश्च॑ त्वाऽपा॒नश्च॑ श्रीणीताम्।
चक्षु॑श्च त्वा॒ श्रोत्रं॑ च श्रीणीताम्।

दक्ष॑श्च त्वा॒ बलं॑ च श्रीणीताम्।
ओज॑श्च त्वा॒ सह॑श्च श्रीणीताम्।
आयु॑श्च त्वा ज॒रा च॑ श्रीणीताम्।
आ॒त्मा च॑ त्वा त॒नूश्च॑ श्रीणीताम्।
शृ॒तो॑ऽसि शृ॒तं कृ॑तः।
शृ॒ताय॑ त्वा शृ॒तेभ्य॑स्त्वा।
यमिन्द्र॑मा॒हुर्वरु॑णं॒ यमा॒हुः।
यं मि॒त्रमा॒हुर्यमु॒ स॒त्यमा॒हुः॥ **98**॥

यो दे॒वानां᳚ दे॒वत॑मस्तपो॒जाः।
तस्मै᳚ त्वा॒ तेभ्य॑स्त्वा।
मयि॒ त्यदि॑न्द्रि॒यं म॒हत्।
मयि॒ दक्षो॒ मयि॒ क्रतु॑ः।
मयि॑ धायि सु॒वीर्य᳚म्।
त्रि॒शु॑ग्घ॒र्मो विभा॑तु मे।
आकू᳚त्या॒ मन॑सा स॒ह।
वि॒राजा॒ ज्योति॑षा स॒ह।
य॒ज्ञेन॒ पय॑सा स॒ह।
तस्य॒ दोह॑मशीमहि॥ **99**॥

तस्य॑ सु॒म्नम॑शीमहि।
तस्य॑ भ॒क्षम॑शीमहि।

वाग्जुंषा॒णा सोमंस्य तृप्यतु।
मि॒त्रो जना॒न्प्रसमिंत्र।
यस्मा॒न्न जा॒तः परो॑ अ॒न्यो अस्तिं।
य आंवि॒वेश॒ भुवंनानि॒ विश्वाँ।
प्र॒जापंतिः प्र॒जया॑ संविदा॒नः।
त्रीणि॒ ज्योतीग्ंषि सचते॒ सषो॑ड॒शी।
ए॒ष ब्र॒ह्मा य ऋ॒त्वियः।
इन्द्रो॒ नाम॑ श्रु॒तो ग॒णे॥ **100**॥

प्र ते॑ म॒हे वि॒दथे॑ऽशग्ंसिष॒ग्ं हरीं।
य ऋ॒त्विय॒ः प्र ते॑ वन्वे।
व॒नुषो॑ हर्य॒तं मदंम्।
इन्द्रो॒ नाम॑ घृ॒तं न यः।
हरिंभि॒श्चारु॒ सेचंते।
श्रु॒तो ग॒ण आ त्वा॑ विशन्तु।
हरिंवर्पस॒ं गिरंः।
इन्द्राधिंप॒तेऽधिंपति॒स्त्वं दे॒वानांमसि।
अधिंपतिं॒ माम्।
आयुंष्मन्त॒ं वर्चस्वन्तं मनु॒ष्येषु कुरु॥ **101**॥

इन्द्रंश्च स॒म्राड्वरुंणश्च॒ राजाँ।
तौ ते॑ भ॒क्षं चंक्रतु॒रग्रं ए॒तम्।

तयो॒रनु॑ भ॒क्षं भ॑क्षयामि।
वाग्जु॑षा॒णा सोम॑स्य तृप्यतु।
प्र॒जाप॑तिर्वि॒श्वक॑र्मा।
तस्य॒ मनो॑ दे॒वं य॒ज्ञेन॑ राध्यासम्।
अ॒र्थे॒ गा अ॒स्य ज॑हितः।
अ॒व॒सान॑पतेऽव॒सानं॑ मे विन्द।
नमो॑ रु॒द्राय॑ वास्तो॒ष्पत॑ये।
आय॑ने वि॒द्रव॑णे॥ **102**॥

उ॒द्या॒ने॒ यत्प॒राय॑णे।
आ॒वर्त॑ने वि॒वर्त॑ने।
यो गो॑पा॒यति॒ तग्ं हु॑वे।
यान्य॑पा॒मित्या॒न्यप्र॑तीत्ता॒न्यस्मि॑।
य॒मस्य॑ ब॒लिना॒ चरा॑मि।
इ॒हैव सन्तः॒ प्रति॒ तद्या॑तयामः।
जी॒वा जी॒वेभ्यो॒ निह॑राम एनत्।
अ॒नृ॒णा अ॒स्मिन्न॑नृ॒णाः पर॑स्मिन्न्।
तृ॒तीये॑ लो॒के अ॑नृ॒णाः स्या॑म।
ये दे॑व॒याना॑ उ॒त पि॑तृ॒याणाः॑॥ **103**॥

सर्वा᳚न्प॒थो अ॑नृ॒णा आक्षी॑येम।
इ॒दमू॒नुः श्रेयो॑ऽव॒सान॒माग॑न्म।

sunder kidāmbi prapatti dot com sunder kidāmbi

शि॒वे नो॒ द्यावा॑पृथि॒वी उ॒भे इ॒मे।
गोम॒द्धन॑व॒दश्व॑व॒दूर्ज॑स्वत्।
सु॒वीरा॑ वी॒रैर॑नु॒ सञ्च॑रेम।
अ॒र्कः प॒वि॒त्रग्ं॒ रज॑सो वि॒मान॑ः।
पु॒नाति॑ दे॒वानां॒ भुव॑नानि॒ विश्वा᳚।
द्यावा॑पृथि॒वी पय॑सा सं॑विदा॒ने।
घृ॒तं दु॑हाते अ॒मृत॒ं प्रपी॑ने।
प॒वित्र॑म॒र्को रज॑सो वि॒मान॑ः।
पु॒नाति॑ दे॒वानां॒ भुव॑नानि॒ विश्वा᳚।
सु॒व॒र्ज्योति॒र्यशो॑ म॒हत्।
अ॒शी॒महि॑ गा॒धमु॒त प्र॑ति॒ष्ठाम्॥ **104**॥

चा॒त॒य॒त॒ श्री॒णी॒ता॒ग्ं॒ स॒त्यमा॒हुर॑शीमहि ग॒णे कु॑रु वि॒द्रव॑णे
पि॒तृया॑णा॒ अ॒र्को रज॑सो वि॒मान॒स्त्रीणि॑ च॥ **9**॥

उद॑स्ता॒प्सीथ्स॑वि॒ता मि॒त्रो अ॑र्य॒मा।
सर्वा॑न॒मित्रा॑नवधी॒द्युगे॑न।
बृ॒हन्त॒ं माम॑करद्वी॒रव॑न्तम्।
र॒थ॒न्त॒रे श्र॑यस्व॒ स्वाहा॑ पृथि॒व्याम्।
वा॒म॒दे॒व्ये श्र॑यस्व॒ स्वाहा॒ऽन्तरि॑क्षे।
बृ॒ह॒ति श्र॑यस्व॒ स्वाहा॑ दि॒वि।
बृ॒ह॒ता त्वोप॑स्तभ्नोमि।

आ त्वा॑ ददे॒ यश॑से वी॒र्या॑य च।
अ॒स्मास्व॑घ्निया यू॒यं द॑धाथेन्द्रि॒यं पय॑ः।
यस्ते᳚ द्र॒प्सो यस्त॑ उद॒र्॒षः॥ **105**॥

दैव्य॑ः के॒तुर्विश्वं॒ भुव॑नमावि॒वेश॑।
स न॑ः पा॒ह्यरि॑ष्ट्यै॒ स्वाहा᳚।
अनु॑ मा॒ सर्वो॑ य॒ज्ञो॑ऽयमे॑तु।
विश्वे॑ दे॒वा म॒रुत॒ः सामा॒र्कः।
आ॒प्रिय॒श्छन्दाग्ं॑सि नि॒विदो॒ यजूग्ं॑षि।
अ॒स्यै पृ॑थि॒व्यै यद्य॒ज्ञिय᳚म्।
प्र॒जाप॑तेर्वर्त॒निमनु॑वर्तस्व।
अनु॑ वी॒रैरनु॑राध्याम॒ गोभि॑ः।
अन्वश्वै॒रनु॒ सर्वै॑रु पु॒ष्टैः।
अनु॑ प्र॒जयाऽन्वि॑न्द्रि॒येण॑॥ **106**॥

दे॒वा नो॑ य॒ज्ञमृ॑जु॒धा न॑यन्तु।
प्रति॑ क्ष॒त्रे प्रति॑ तिष्ठामि रा॒ष्ट्रे।
प्रत्यश्वे॑षु प्रति॑तिष्ठामि॒ गोषु॑।
प्रति॑ प्र॒जाया॒॑ प्रति॑तिष्ठामि॒ भव्ये᳚।
विश्व॑म॒न्याऽभि॑वावृधे।
तद॒न्यस्या॒मधि॑श्रि॒तम्।
दि॒वे च॑ वि॒श्वक॑र्मणे।

पृ॒थि॒व्यै चा॑कर॒न्नमः॑।
अस्का॒न्द्यौः पृ॑थि॒वीम्।
अस्का॑नृष॒भो युवा॒ गाः॥ **107**॥

स्क॒न्नेमा विश्वा॒ भुव॑ना।
स्क॒न्नो य॒ज्ञः प्रज॑नयतु।
अस्का॒नज॑नि॒ प्राज॑नि।
आस्क॒न्नाज्जा॑यते॒ वृषा᳚।
स्क॒न्नात्प्रज॑निषीमहि।
ये दे॒वा येषा॑मि॒दं भा॑ग॒धेयं॑ ब॒भूव॑।
येषा᳚ं प्रया॒जा उ॒तानू॑या॒जाः।
इन्द्र॑ज्येष्ठेभ्यो॒ वरु॑णराजभ्यः।
अ॒ग्निहो॑तृभ्यो दे॒वेभ्यः॒ स्वाहा᳚।
उ॒त त्या नो॒ दिवा॑ म॒तिः॥ **108**॥

अदि॑तिरू॒त्याऽऽग॑मत्।
सा शन्ता॑ची॒ मय॑स्करत्।
अप॒ स्रिधः॑।
उ॒त त्या दैव्या॑ भि॒षजा᳚।
शं न॑स्करतो अ॒श्विना᳚।
यू॒याता॑म॒स्मद्रपः॑।
अप॒ स्रिधः॑।

शम॒ग्निर॒ग्निभि॑स्करत्।
शं न॑स्तपतु॒ सूर्यः॑।
शं वातो॑ वात्वर॒पाः॥ **109**॥

अप॒ स्रिधः॑।
तदित्प॒दं न विचि॑केत वि॒द्वान्।
यन्मृ॒तः पुन॑र॒प्येति॑ जी॒वान्।
त्रि॒वृद्यद्भुव॑नस्य रथ॒वृत्।
जी॒वो गर्भो॒ न मृ॒तः स जी॑वात्।
प्रत्य॑स्मै॒ पिपी॑षते।
विश्वा॑नि वि॒दुषे॑ भर।
अ॒र॒ङ्ग॒माय॒ जग्म॑वे।
अप॑श्चाद्दघ्वने॒ नरे᳚।
इन्दु॒रिन्दु॒मवा॑गात्।
इन्दो॒रिन्द्रो॑ऽपात्।
तस्य॑ त इन्द॒विन्द्र॑पीतस्य॒ मधु॑मतः।
उप॑हूत॒स्योप॑हूतो भक्षयामि॥ **110**॥

*उ॒द॒र॒ष इ॑न्द्रि॒येण॒ गा म॒तिर॑र॒पा अं॑गा॒त्त्रीणि॑ च॥ **10**॥*

ब्रह्म॑ प्रति॒ष्ठा मन॑सो॒ ब्रह्म॑ वा॒चः।
ब्रह्म॑ य॒ज्ञानाग्ं॑ ह॒विषा॒माज्य॑स्य।
अति॑रिक्तं॒ कर्म॑णो॒ यच्च॑ ही॒नम्।

यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्न्।
स्वाहाकृताऽऽहुतिरेतु देवान्।
आश्रावितमत्याश्रावितम्।
वषट्कृतमत्यनूक्तं च यज्ञे।
अतिरिक्तं कर्मणो यच्च हीनम्।
यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्न्।
स्वाहाकृताऽऽहुतिरेतु देवान्॥ **111** ॥

यद्वो देवा अतिपादयानि।
वाचा चित्प्रयतं देव हेडनम्।
अरायो अस्मागं अभिदुच्छुनायते।
अन्यत्रास्मन्मरुतस्तन्निधेतन।
ततं म आपस्तदु तायते पुनः।
स्वादिष्ठा धीतिरुचथाय शस्यते।
अयगं समुद्र उत विश्वभेषजः।
स्वाहाकृतस्य समुतृप्णुतर्भुवः।
उद्वयं तमसस्परि।
उदुत्यं चित्रम्॥ **112** ॥

इमं मे वरुण तत्त्वा यामि।
त्वं नो अग्ने स त्वं नो अग्ने।
त्वमग्ने अयाऽसि प्रजापते।

इ॒मं जी॒वेभ्यः॑ परि॒धिं द॑धामि।
मैषां॒ नु गा॒दप॑रो॒ अर्थ॑मे॒तम्।
श॒तं जीव॑न्तु श॒रदः॑ पु॒रू॒चीः।
ति॒रो मृ॒त्युं द॑धतां॒ पर्व॑तेन।
इ॒ष्टेभ्यः॒ स्वाहा॒ वष॒डनि॑ष्टेभ्यः॒ स्वाहा᳚।
भे॒ष॒जं दु॒रि॑ष्ट्यै॒ स्वाहा॒ निष्कृ॑त्यै॒ स्वाहा᳚।
दौरा᳚ध्यै॒ स्वाहा॒ दैवी᳚भ्यस्त॒नूभ्यः॒ स्वाहा᳚॥ **113**॥

ऋद्ध्यै॒ स्वाहा॒ समृ॑द्ध्यै॒ स्वाहा᳚।
यत॑ इन्द्र॒ भया॑महे।
ततो॑ नो॒ अभ॑यं कृधि।
मघ॑वञ्छ॒ग्धि तव॒ तन्न॑ ऊ॒तये᳚।
वि द्विषो॒ वि मृधो॑ जहि।
स्व॒स्ति॒दा वि॒शस्पतिः॑।
वृ॒त्र॒हा विमृधो॑ व॒शी।
वृषेन्द्रः॑ पु॒र ए॑तु नः।
स्व॒स्ति॒दा अ॑भयङ्क॒रः।
आ॒भिर्गी॒र्भिर्यदतो॑ न ऊ॒नम्॥ **114**॥

आप्या॑यय हरिवो॒ वर्ध॑मानः।
य॒दा स्तो॒तृभ्यो॒ महि॑ गो॒त्रा रु॒जासि॑।
भू॒यि॒ष्ठ॒भाजो॒ अध॑ ते स्याम।

अनाँज्ञातं यदाज्ञांतम्।
यज्ञस्यं क्रियते मिथुं।
अग्ने तदंस्य कल्पय।
त्वगं हि वेत्थं यथातथम्।
पुरुंषसम्मितो यज्ञः।
यज्ञः पुरुंषसम्मितः।
अग्ने तदंस्य कल्पय।
त्वगं हि वेत्थं यथातथम्।
यत्पांकत्रा मनंसा दीनदंक्षा न।
यज्ञस्यं मन्वते मर्तांसः।
अग्निष्टद्धोतां क्रतुविद्विंजानन्।
यजिंष्ठो देवागं ऋंतुशो यंजाति॥ **115**॥

देवागश्चित्रं तनूभ्यस्स्वाहोनं पुरुंषसम्मितोऽग्ने तदंस्य कल्पय पञ्चं च॥ **11**॥

यद्देवा देवहेडंनम्।
देवांसश्चकृमा वयम्।
आदिंत्यास्तस्माँन्मा मुञ्चत।
ऋतस्यर्तेन मामुत।
देवां जीवनकाम्या यत्।
वाचाऽनृंतमूदिम।



sunder kidambi
prapatti dot com
sunder kidambi

अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
गार्ह॑पत्यः॒ प्रमु॑ञ्चतु।
दु॒रि॒ता यानि॑ चकृ॒म।
क॒रोतु॒ माम॑ने॒नस᳚म्॥ **116**॥

ऋ॒तेन॑ द्यावापृथिवी।
ऋ॒तेन॒ त्वग्ं स॑रस्वति।
ऋ॒तान्मा॑ मुञ्च॒ताग्ंह॑सः।
यद॒न्यकृ॑तमारि॒म।
स॒जा॒त॒श॒ग्ंसादु॒त वा॑ जामिश॒ग्ंसात्।
ज्याय॑सः॒ शग्ंसा॑दु॒त वा॒ कनी॑यसः।
अना᳚ज्ञातं दे॒वकृ॑तं॒ यदेन॑ः।
तस्मा॒त्त्वम॒स्माञ्जा॑तवेदो मुमुग्धि।
यद्वा॒चा यन्मन॑सा।
बा॒हुभ्या॑मू॒रुभ्या॑मष्ठी॒वद्भ्या᳚म्॥ **117**॥

शि॒श्नैर्यदनृ॑तं चकृ॒मा व॒यम्।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
यद्धस्ता᳚भ्यां च॒कर॒ किल्बि॑षाणि।
अ॒क्षाणां᳚ व॒ग्नुमु॑प॒जिघ्न॑मानः।
दू॒रे॒प॒श्या च॑ राष्ट्र॒भृच्च॑।
तान्य॑प्स॒रसा॒वनु॑दत्तामृ॒णानि॑।

अदी᳚व्यन्नृ॒णं यद॒हं च॒कार॑।
यद्वा॑ऽदा᳚स्यन्थ्सञ्ज॒गारा॒ जने᳚भ्यः।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
यन्मयि॑ मा॒ता गर्भे॑ स॒ति॥ **118**॥

एन॑श्च॒कार॒ यत्पि॒ता।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
यदा॑ पि॒पेष॑ मा॒तरं॑ पि॒तर᳚म्।
पु॒त्रः प्रमु॑दितो॒ धय॑न्न्।
अहि॑ग्ंसितौ पि॒तरौ॒ मया॒ तत्।
तद॑ग्ने अनृ॒णो भ॑वामि।
यद॒न्तरि॑क्षं पृथि॒वीमु॒त द्याम्।
यन्मा॒तरं॑ पि॒तरं॑ वा जिहि॑ग्ंसि॒म।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
यदा॒शसा॑ नि॒शसा॒ यत्प॑रा॒शसा᳚॥ **119**॥

यदेन॑श्चकृ॒मा नूत॑नं॒ यत्पु॑रा॒णम्।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः।
अति॑क्रामामि दुरि॒तं यदेनः॑।
जहा॑मि रि॒प्रं प॑र॒मे स॒धस्थे᳚।
यत्र॒ यन्ति॑ सु॒कृतो॒ नापि॑ दु॒ष्कृतः॑।
तमारो॑हामि सु॒कृतां॒ नु लो॒कम्।

त्रि॒ते दे॒वा अ॑मृजतै॒तदेनः॑।
त्रि॒त ए॒तन्म॑नु॒ष्ये॑षु मामृजे।
ततो॑ मा॒ यदि॒ किञ्चि॑दान॒शे।
अ॒ग्निर्मा॒ तस्मा॒देन॑सः॥ **120**॥

गार्ह॑पत्यः॒ प्रमु॑ञ्चतु।
दु॒रि॒ता यानि॑ चकृ॒म।
क॒रोतु॒ माम॑ने॒नस॓म्।
दि॒वि जा॒ता अ॒प्सु जा॒ताः।
या जा॒ता ओष॑धीभ्यः।
अथो॒ या अ॑ग्नि॒जा आपः॑।
ता नः॑ शुन्धन्तु॒ शुन्ध॑नीः।
यदापो॒ नक्तं॑ दु॒रि॒तं चरा॑म।
यद्वा॒ दिवा॒ नूत॑नं॒ यत्पु॑रा॒णम्।
हिर॑ण्यवर्णा॒स्तत॒ उत्पु॑नीत नः।
इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि।
त्वं नो॑ अग्ने॒ स त्वं नो॑ अग्ने।
त्वम॑ग्ने अ॒याऽसि॑॥ **121**॥

अ॒ने॒नस॑मष्ठी॒वद्भ्याग्॒ं स॒ति प॑रा॒शसा॑ऽऽन॒शे॓ऽग्निर्मा॒ तस्मा॒देन॑सः पुनीत न॒स्त्रीणि॑ च॥ **12**॥

यद्देवा देवाः ऋतेन सजातशगुंसाद्यद्वाचा
यद्धस्ताँभ्यामदीँव्यं यन्मयिं माता यदां पिपेष
यदन्तरिंक्षं यदाशसाऽतिंक्रामामि त्रिते देवा दिवि जाता
अफ्सु जाता यदापं इमं मे वरुण तत्त्वां यामि त्वन्नो
अग्ने स त्वन्नो अग्ने त्वमंग्ने अयाऽसिं॥

यत्ते ग्राव्णां चिच्छिदुः सोम राजन्।
प्रियाण्यङ्गांनि स्वधिंता परूंग्षि।
तथ्सन्धथ्स्वाज्यैंनोत वंर्धयस्व।
अनागसो अधमिथ्संक्षयेम।
यत्ते ग्रावां बाहुच्युंतो अचुंच्यवुः।
नरो यत्ते दुदुहुर्दक्षिंणेन।
तत्त आप्यांयतां तत्तें।
निष्ट्यांयतां देव सोम।
यत्ते त्वचं बिभिदुर्यच्च योनिंम्।
यदास्थानात्प्रच्युंतो वेनंसि त्मनाँ॥ **122**॥

त्वया तथ्सोंम गुप्तमंस्तु नः।
सा नः सन्धाऽसंत्परमे व्योंमन्।
अहाच्छरीरं पयंसा समेत्यं।
अन्योँऽन्यो भवति वर्णो अस्य।
तस्मिंन्वयमुपंहूतास्तवं स्मः।
आ नों भज सदंसि विश्वरूंपे।

नृचक्षा॒ः सोम॑ उ॒त शु॒श्रुग॑स्तु।
मा नो॒ विहा॑सी॒द्गिर॑ आवृणा॒नः।
अना॑गास्त॒नुवो॑ वावृधा॒नः।
आ नो॑ रू॒पं व॑हतु॒ जाय॑मानः॥ **123**॥

उप॑क्षरन्ति जु॒ह्वो॑ घृ॒तेन॑।
प्रि॒याण्यङ्गा॑नि॒ तव॑ व॒र्धय॑न्तीः।
तस्मै॑ ते सोम॒ नम॒ इद्वष॑ट्च।
उप॑ मा राजन्थ्सुकृ॒ते ह्व॑यस्व।
सं प्रा॑णापा॒नाभ्या॒ग्ं॒ समु॒ चक्षु॑षा॒ त्वम्।
सग्ग् श्रोत्रे॑ण गच्छस्व सोम राजन्न्।
यत्त॒ आस्थि॑त॒ग्ं॒ शमु॒ तत्ते॑ अस्तु।
जा॒नी॒तान्नः॑ स॒ङ्गम॑ने पथी॒नाम्।
ए॒तं जा॑नीतात्पर॒मे व्यो॑मन्न्।
वृकाः॑ सधस्था वि॒द रू॒पम॑स्य॥ **124**॥

यदा॒ गच्छा॑त्प॒थिभि॑र्देव॒यानैः॑।
इ॒ष्टा॒पू॒र्ते कृ॑णुतादा॒विर॑स्मै।
अरि॑ष्टो राजन्नग॒दः परे॑हि।
नम॑स्ते अस्तु॒ चक्ष॑से रघूय॒ते।
नाक॒मारो॑ह स॒ह यज॑मानेन।
सूर्यं॑ गच्छतात्पर॒मे व्यो॑मन्न्।

अभू᳚द्दे॒वः स॑वि॒ता वन्द्यो॒ नु नः॑।
इ॒दानी॒मह्न॑ उप॒वाच्यो॒ नृभिः॑।
वि यो रत्ना॒ भज॑ति मान॒वेभ्यः॑।
श्रेष्ठं॑ नो॒ अत्र॒ द्रवि॑णं॒ यथा॒ दध॑त्।
उप॑ नो मित्रावरुणावि॒हाव॑तम्।
अ॒न्वादी᳚ध्याथामि॒ह नः॑ सखाया।
आ॒दि॒त्यानां॒ प्रसि॑तिर् हे॒तिः।
उ॒ग्रा श॒तपा᳚ष्ठा घ॒ विषा॒ परि॑णो वृणक्तु।
आप्या॑यस्व॒ सं ते᳚॥ **125**॥

त्मना॒ जाय॑मानोऽस्य॒ दध॒त्पश्च॑ च॥ **13**॥

यद्दि॑दी॒क्षे मन॑सा॒ यच्च॑ वा॒चा।
यद्वा᳚ प्रा॒णैश्चक्षु॑षा॒ यच्च॒ श्रोत्रे॑ण।
यद्रेत॑सा मिथु॒नेनाप्या॒त्मना᳚।
अ॒द्भ्यो लो॒का द॑धिरे॒ तेज॑ इन्द्रि॒यम्।
शु॒क्रा दी॒क्षायै॒ तप॑सो वि॒मोच॑नीः।
आपो॑ विमो॒क्त्रीर्मयि॒ तेज॑ इन्द्रि॒यम्।
यदृ॒चा साम्ना॒ यजु॑षा।
प॒शू॒नां चर्म॑न् ह॒विषा॑ दिदी॒क्षे।
यच्छन्दो॑भि॒रोष॑धीभि॒र्वन॒स्पतौ᳚।
अ॒द्भ्यो लो॒का द॑धिरे॒ तेज॑ इन्द्रि॒यम्॥ **126**॥

शु॒क्रा दी॒क्षायै॒ तप॑सो वि॒मोच॑नीः।
आपो॑ विमो॒क्त्रीर्मयि॒ तेज॑ इन्द्रि॒यम्।
येन॒ ब्रह्म॒ येन॑ क्ष॒त्रम्।
येने᳚न्द्रा॒ग्नी प्र॒जाप॑ति॒ः सोमो॒ वरु॑णो॒ येन॒ राजा᳚।
विश्वे॑ दे॒वा ऋष॑यो॒ येन॑ प्रा॒णाः।
अ॒द्भ्यो लो॒का द॑धिरे॒ तेज॑ इन्द्रि॒यम्।
शु॒क्रा दी॒क्षायै॒ तप॑सो वि॒मोच॑नीः।
आपो॑ विमो॒क्त्रीर्मयि॒ तेज॑ इन्द्रि॒यम्।
अ॒पां पुष्प॑म॒स्योष॑धीना॒ग्ं॒ रस॑ः।
सोम॑स्य प्रि॒यं धाम॑॥ **127**॥

अ॒ग्नेः प्रि॒यत॑मग्ं ह॒विः स्वाहा᳚।
अ॒पां पुष्प॑म॒स्योष॑धीना॒ग्ं॒ रस॑ः।
सोम॑स्य प्रि॒यं धाम॑।
इन्द्र॑स्य प्रि॒यत॑मग्ं ह॒विः स्वाहा᳚।
अ॒पां पुष्प॑म॒स्योष॑धीना॒ग्ं॒ रस॑ः।
सोम॑स्य प्रि॒यं धाम॑।
विश्वे॑षां दे॒वाना᳚ं प्रि॒यत॑मग्ं ह॒विः स्वाहा᳚।
व॒यग्ं सो॑म व्र॒ते तव॑।
मन॑स्त॒नूषु॒ पिप्र॑तः।
प्र॒जाव॑न्तो अशीमहि॥ **128**॥

दे॒वेभ्यः॑ पि॒तृभ्य॒ः स्वाहा᳚।
सो॒म्येभ्यः॑ पि॒तृभ्य॒ः स्वाहा᳚।
क॒व्येभ्यः॑ पि॒तृभ्य॒ः स्वाहा᳚।
देवा॑स इ॒ह मा॑दयध्वम्।
सोम्या॑स इ॒ह मा॑दयध्वम्।
कव्या॑स इ॒ह मा॑दयध्वम्।
अन॑न्तरिताः पि॒तर॑ः सो॒म्याः सो॑मपी॒थात्।
अपै॑तु मृ॒त्युर॒मृत॑ं न॒ आग॑न्न्।
वै॒व॒स्व॒तो नो॒ अभ॑यं कृणोतु।
प॒र्णं व॒न॒स्पते॑रिव॥ **129**॥

अ॒भि न॑ः शीयताग्ं र॒यिः।
सच॑तान्न॒ः शची॒पति॑ः।
पर॑ं मृत्यो॒ अनु॒परे॑हि॒ पन्था᳚म्।
यस्ते॒ स्व इत॑रो देव॒याना᳚त्।
चक्षु॑ष्मते शृण्व॒ते ते᳚ ब्रवीमि।
मा न॑ः प्र॒जाग्ं री॑रिषो॒ मोत वी॒रान्।
इ॒दमू॒ नु श्रेयो॑ऽव॒सान॒माग॑न्म।
यद्गो॒जिद्ध॑न॒जिद॑श्व॒जिद्यत्।
प॒र्णं व॒न॒स्पते॑रिव।
अ॒भि न॑ः शीयताग्ं र॒यिः।
सच॑तान्न॒ः शची॒पति॑ः॥ **130**॥

वन॒स्पतां॑व॒द्भ्यो लो॒का द॑धिरे॒ तेज॑ इन्द्रि॒यं
धामा॑ऽशीमहीवा॒ऽभि न॑श्शीयताग्ं र॒यिरेक॑ च॥ 14॥

सर्वा॒न् यद्वि॒ष्वं॑ण्णेन॒ वि वै याः पु॒रस्ता॒द्देवा॑
दे॒वेषु॒ परि॑स्तृणीत॒ सक्षे॒दं यद॒स्य पा॒रे॑ऽना॒गस॒
उद॑स्तां॒फ्सीद्ब्रह्म॑ प्रति॒ष्ठा यद्दे॑वा॒ यत्ते॒
ग्राव्ण्णा॒ यद्दि॑दी॒क्षे चतु॑र्दश॥ 14॥

सर्वा॒न्भूति॑मे॒व यामे॒वाऽफ्स्वाहु॑तिं व्र॒ताना॑ं
पर्णव॒ल्कस्सो॒म्याना॑मस्मिन् य॒ज्ञेऽग्ने॒ यो नो॒
ज्योग्जी॒वाः प॒रोर॑जाः प्र ते॑ म॒हे ब्रह्म॑ प्रति॒ष्ठा
गार्ह॑पत्यस्त्रि॒ग्ं॒शद॑त्तर श॒तम्॥ 130॥

सर्वा॒ञ्छची॒पति॑ः॥

॥ हरि॑ः ओ(३)म्॥

॥ इति कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टके सप्तमः प्रश्नः समाप्तः॥